ग्र.प. गंगालहरी
ले. जगन्नाथ
40 पत्र

ग्रह्मेत्युक्तम् ननानेहास्तीतिश्रुतिवचनजातैर्भगवतीनिरस्यैवाभासि स्वयमखिलभेदंसुरधुनि निदान्तैकानि
त्यावितिसुखसदाविस्फूतिरसित्वदीयंमोक्षार्थंमतिजनितानजीवनपदमिति अत्रशिष्यबुद्धिवैशद्यायकिं
चिदुच्यते वेदोनामब्रह्मप्रतिपादकमपौरुषेयंप्रमाणवाक्यम् सचमंत्रः ब्राह्मणात्मकः तत्रमंत्रानामनुष्ठान
कारकभूतद्रव्यदेवताप्रकाशकाः तेचऋग्यजुःसामभेदास्त्रिधा पादबंधगायत्र्यादिछंदोविशिष्टाऋचः अग्नि
मीळइत्यादयः गीतविशिष्टाःताएवसामानि उभयविलक्षणानियजूंषि ब्राह्मणमपित्रिविधंविधिरूपंअनु

महादानैर्ध्यानैर्बहुविधवितानैरपिचयन्नलभ्यंघोराभिःसुविमलतपोराशिभिरपि

वादरूपंउभयवि
लक्षणंचेतिमीमांसाग्रंथेभ्योवधेयम् इहविस्तरभयान्नतन्यतइतिदिक् १० इदानींनिखिललोकानांसाधारण्ये
नात्यंतदुष्प्रापविष्णुपददात्रीत्वंनकेनापितुलनीयेत्याह महादानैरिति भोभागीरथि अखिलसाधारणतया अ
खिलानांसर्वलोकानांसाधारणतासाधारण्यंनतुन्यूनाधिक्यं तयाविष्णोर्नारायणस्य विष्णुर्नारायणः कृष्ण
इत्यमरः पदंचरणंवैकुंठस्यस्थानंवा यद्वाविष्णोः पदंवस्तु विष्णुरूपवस्त्वित्यर्थः अस्मिन्पक्षेराहोःशिरइतिव

प्राणिनांमनोवागवसरः मनश्चवाक्च अनयोःसमाहारः मनोवाक् द्वंद्वश्चप्राणीत्येकवद्भावः मनोवाचामवसरः
व्यापारइतियावत् नप्रसरति नप्रसरणशीलोभवतीत्यर्थः यतोवाचोनिवर्तंते अप्राप्यमनसासहेतिश्रुतेरितिभावः
ननुमनोवागित्यत्रद्वंद्वश्च प्राणीतिनियमान्नित्यसमाहारेद्वंद्वाच्चुदषसहांतादितिटचःप्राप्त्यम् तथाचोक्तप्रयोगा
संगतिरितिचेन्न समासांतविधेरनित्यत्वात् अत्रप्रमाणंतु अश्वादिगणेराजन्शब्दपाठः इतिदिक् मनःशब्द
स्यप्राण्यंगत्वाभावेनशंकैवनेतिवा पु० निराकारंनिर्गतः आकारोयस्यतत् अशरीरमित्यर्थः अपाणिपादमित्या

निराकारंनित्यंनिजमहिमनिर्वासिततमोविशुद्धंयत्तत्वंस्फुरतिदिनित्यंनविषयः १०

दिश्रुतेः पु० नित्यंनिरंतरंभवंनित्यम् अव्ययात्यप् उत्पत्त्यादिशून्यमित्यर्थः नजायतेम्रियतेइत्यादिस्मृतेरित्य
र्थः पु० निजमहिमनिर्वासिततमः निजमहिम्नास्वमाहात्म्येननिर्वासितंनाशितंतमोयेनतत् स्वप्रकाशमित्य
र्थः यस्यभासासर्वमिदंविभाति यदादित्यगतंतेजोजगद्भासयतेखिलम् यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमाम
कम् इत्यादिश्रुतिस्मृतिभ्यामित्यर्थः पु० विशुद्धंमायामलरहितम् नारायणतीर्थसरस्वतीभिरपि गंगैवाद्वितीयं

377

इदानींस्मरणोच्चारणाभ्यांक्रमेणमनः शांतिपापसंसारतापनाशजनकंगंगेतिपदंमरणासमयेमन्मुखेस्त्विइ
त्याह स्मृतमिति भोभागीरथि तत् गंगेतिपदंस्फुरत्वंतं ममजगन्नाथस्य प्राणप्रांतः प्राणानामसूनाम्
पुंसिभूम्न्यसवः प्राणाइत्यमरः अंतःसमासौ अंतःशब्दोधिकरणप्रधानमव्ययम् प्राणोत्क्रमणसमय
इत्यर्थः वदनकमलांतः वदनमेवकमलमिति मयूरव्यंसकादित्वात्समासः वदनंकमलमिवेत्युपमितस
मासोवा तस्यांतर्मध्येविलसतु शोभतु खलुनिश्चयेनप्राणोत्क्रमणसमये गंगागंगेत्युच्चारणं भवतु कफ

स्मृतंसद्यःस्वांतंविरचयतिशांतंसकृदपिप्रगीतंयत्पापंझटितिभवतापंचहरति इदंतद्गंगेतिश्र
वणरमणीयंखलुपदंममप्राणप्रांतर्वदनकमलांतर्विलसतु ८

वातपित्तैः कंठावरोधनंमास्त्वितिभावः
तत्किंयत् गंगेतिपदंसकृदपिएकवारमपिस्मृतंसत् स्वांतंमनः शांतंइंद्रियनिग्रहक्षमं द्वेषलोभादिरहितंवावि
रचयति करोति शांतंसुखयुक्तंवा शांतशब्दादर्श आद्यच् शर्मशांतसुखानिचेत्यमरः रचप्रतियत्नेचुरादिः पु
नस्तत्किम् यत्सकृदपिप्रगीतंसत् प्रकर्षेणगीतंसत् उच्चारितंसत् पापंचपुनः भवतापंभवस्यसंसारस्यतापः

तं हरति नाशयति पुनरूं० श्रवणरमणीयं श्रवणयोः रमणीयं सुखजनकं कर्णशब्द ग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवइत्यमरः यद्वा श्रवणाय श्रवणं कर्तुं रमणीयं सुंदरम् चतुर्थीति योगविभागात्समासः गंगाशब्दार्थ स्तु गां पृथ्वीं स्वर्लोकादागता गंगा गनाम्न्यधोरिस्यौणादिकोगन् प्रत्ययः तदुक्तं ब्रह्मांडपुराणे तिस्रोनद्यो महापुण्यावेणा गोदा च जान्हवी गां हरीशांघ्रिकाश्चा सागंगेतीह प्रकीर्तितेति हरेः पादाच्छंभोर्मस्तकात् गांमासेति तदर्थः यद्वा गम्यते सोपानभूतयायया स्वर्गः सागंगा तदुक्तमाचार्यैः स्वर्गसोपानसंगेइति यास्केनापिनि

यदंतः खेलंतो बहुलतरसंतोषभरिता नकाका नाकाधीश्वरनगरसाकांक्षमनसः

रुक्तेगमनाद्गंगेति सामान्यत एवोक्तमितिदिक्० इदानीं करटानामपि इंद्रोद्यानापेक्षयाधिकतरं तवतीरं समस्तश्रमनाशनसमर्थमस्त्विति प्रार्थयते यदिति भोभागीरथि ते तव तत् एतत् समीपवर्तितीरं नः अस्माकं श्रमशमनधीरं श्रमस्यशमनं तत्र धीरं समर्थं पंडितं वा धीरो मनीषीज्ञः प्राज्ञः संख्यावान्पंडितः कविरित्यमरः भवतु अस्तु तत्किम् यदंतः यस्यतीरस्यांतः मध्ये खेलंतः क्रीडंतः काकाः करटाः काकेतु करटारिष्टेत्यमरः बहुलतरसं-

तोषभरिताः संताः अतिशयेनबहुलः बहुलतरः अतिशायनेतरप् बहुलतरश्चासौसंतोषश्चतेनभरिताः पूर्णाः एता
दृशाः संतः नाकाधीश्वरनगरसाकांक्षमनसः नाकस्यसर्गस्य स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाइत्यमरः अ
धीश्वरः पतिः इंद्रः तस्यनगरंअमरावती तत्रसाकांक्षंसाभिलाषंमनोयेषांतेएतादृशानभवंतीतिशेषः अमराव
त्या अपितीरे अधिकगुणासत्वादित्यर्थः तदेवाह कथंभूतंतीरं निवासाद्धेतोः विभाषागुणेस्त्रियामितिहेतौपंच

निवासाल्लोकानांजनिमरणशोकापहरणंतदेततेतीरश्रमशमनधीरं भवतुनः १

मी लोकानांजनिमरणशोकापहरणं जनिरुत्पत्तिः जनिरुत्पत्तिरुद्भवइत्यमरः मरणं निधनं मरणंनिधनोस्त्रिया
मित्यमरः शोकः पुत्रकलत्रादिवियोगजनितमनोविकृतिरूपः त्रयाणांद्वंद्वः एषामपहरणंनाशकम् अमरावत्यांतुक्षीणे
पुण्येमृत्युलोकंविशंतीति पुनरपिभूलोकप्राप्तिरूपानिष्टमप्यस्तीतिभावः कदाचित् विमानस्थेनेंद्रेणतीरेखेलंतः
काकान्दृष्ट्वायुष्माभिः क्रीडार्थंमद्वनेआगंतव्यमित्युक्ते अत्रैववयंनिवसामः नतववनेआगमिष्यामइतितैरुक्तमि
तिस्पष्टं गंगापुराणे १



379

ननुसर्वोत्कृष्टंवेदाद्यगोचरंपरंब्रह्मविहायस्वाभिमतफललाभायमामेवकिंस्तौषीतिचेत्तत्राहत्वंशंब्रह्मतत्त्वमेवनेतरवि
षयइत्याह नयदिति भोस्फुरत्तटिनि सुराणांदेवानांतटिनीधुनीतत्संबोधनम् तटिनीह्लादिनीधुनीत्यमरः तद्दृश्यमा
यादिविशिष्टत्वंनिखिलजगत्कारणत्वेनप्रसिद्धंब्रह्मत्वंसर्वंवाक्यंसावधारणमितिन्यायात्त्वमेवेत्यर्थः असीतिशेषः
नविषयः त्वमितरविषयभूतानासीत्यर्थः तत्किम् यत्ब्रह्मगलितभेदैः गलितःगतःभेदोयेभ्यस्तेगलितभेदाः
तैरद्वैतप्रतिपादकैः नेहनानास्तिकिंचनेत्यादिब्रह्मरूपैः साक्षाद्वेदैरपिप्रत्यक्षश्रुतिभिरपिन अवसितं इयत्तयान

नयत्साक्षाद्वेदैरपिगलितभेदैरवसितंनयस्मिन्जीवानांप्रसरतिमनोवागवसरः ॥

निश्चितमित्यर्थः षोंतकर्मणीतिधातोर्द्यतिस्यतीनीत्वं उपसर्गवशादुक्तार्थलाभः तदुक्तम् उपसर्गेणधात्वर्थोब
लादन्यत्रनीयतइति ननुनेहनानास्तिइत्यादिश्रुतिभिः इतराभावबोधनेपिस्वाभावाबोधनेनकथमद्वैतसिद्धि
रितिचेन्न स्वस्मिन्नपिस्वप्रहत्यास्वाभावस्यापिबोधनात् अतएवससजुषोरुः खरवसानयोर्विसर्जनीयः इत्या
दिनिर्देशाः संगच्छंतेइतिदिक् वेदानामप्यगोचरमित्युक्तत्वादितिभावः पु० यस्मिन्ब्रह्मणिजीवानांव्यासादि

कोशात् स्त्रियामपिलटशब्दः रात्रौरतिसमयेलापितः अतएवस्थितइत्यर्थः एताहृशः मृगमदः कस्तूरी मृगनाभिर्मृगमदः कस्तूरीचेत्यमरः तयतोयैरंभोभिः सहयुक्तेतृतीया अंभोर्णस्तोयपानीयमित्यमरः यावद्यस्मिन्नेवकालेमिलतिसंबद्धोभवति तावत्तस्मिन्नेवकालेमृगाः मृगयंति उदरपोषणायतृणादिकमन्वेषयंतितेमृगाः हरिणाः मृगेकुरंगवातायुहरिणाजिनयोनयइत्यमरः विमलवपुषः विमलंमलरहितंवपुर्येषांते

मृगास्तावद्वैमानिकशतसहस्रैः परिवृताविशं
तिस्वच्छंदंविमलवपुषोनंदनवनम् ७

एताहृशाः संतोनंदनवनंनंदयतीतिनंदनम् नंदादित्वात्ल्युः तच्चतत्वनंच इंद्रोद्यानं नंदनंवनम् अस्योद्यानमित्यमरः स्वच्छंदंयथास्यात्तथाविशंतिगच्छंतीत्यर्थः क्वचित्तुविमलमनयइतिपाठः कथंभूताः मृगाः वैमानिकशतसहस्रैः विमानेश्चरंतिगच्छंतीतिवैमानिकाः देवाः चरतीतिठक् तेषांशतानिशतानांसहस्राणितैः परिवृताः वेष्टिताः ७ ७ ७ ७ ७

रम् अतिशयेनस्वादुः स्वादीयान् अतिशायनेईयसुन् सचासौसलिलभरश्चतं आतृप्तिपर्यंतं पंचम्यपाङ्प
रिभिरितिसमासः पिबतांपानंकुर्वतां पाधातोः शतरिपाघ्रेति पिबादेशः एताहृशानांजनानामानंदः निर्वा
णपदवीम् निर्वाणस्यकैवल्यस्यपदवींमार्गम् मुक्तिः कैवल्यनिर्वाणेत्यमरः परिहसति उपहसति ६ इदा
नींसाक्षात्स्वयंस्नानमकुर्वतामपित्वयि अन्यसंबंधित्वेनस्वावयवपतनेते षामप्युत्तमलोकप्राप्तौसाक्षात्स्ना

सुधातः स्वादीयः सलिलभरमातृप्तिपिबतांजनानामानंदः परिहसतिनिर्वाणपदवीम् ६
प्रभातेस्नातीनांनृपतिरमणीनांकुचतटीगतोयावन्मातर्मिलतितवतोयैर्मृगमदः

यिनांकिंवक्तव्यमित्याह प्रभातइति भोमातः प्रभाते उषसि प्रत्यूषोहर्मुखं कल्यमुषः प्रत्युषसी अपिप्रभातं
चेत्यमरः स्नातीनामर्थात्तवजलेस्नानंकुर्वतीनाम् नृपतिरमणीनां राजसुंदरीणाम् ब्राह्मणादिस्त्रीणांदारि
द्र्यबाहुल्यात् मृगमदोनमिलतीतिउक्तम् नृपतिरमणीनामिति तासांतुसंपत्तिबाहुल्यात्ससुलभइतिभा
वः कुचतटीगतः कुचानांतस्य प्रांतो तासुगतः स्थितःयावत् तटशब्दस्त्रिलिंगःपणोऽङीप् तटीत्रिषुइति

श्रीगणेशायनमः पितुः स्कंधे स्थित्वाविमलमुकुरालोकनधियाहिमांशुं व्याकर्षन्नाहिमयविधूनेनमनसा
विधुंहित्वावन्हिंसरससमणिबुद्ध्यागिरिभुवाशफभं भीतोनीतोदिशतुबहुधः शंभुतनयः १ गंगेत्वद्वारिधाराभ्र
वमरयाजरापारधीरास्तुसाराराजद्देवादिनारीविहरणविलसत्तीरनीरातुषारा दैत्यारात्यंघ्रिचाराहरगिरि
स्कशिरोदेहभारानिधीरारूपेणाक्रांतसारानिजजनवृजिनौघौघहाराविहारा २ अंबांनिजमुखाक्रांतचं
द्रबिंबांनमाम्यहं केदारंवैरिसंदारंमुक्ताहारंचसुंदरम् ३ येनाकारिदशास्योदशमुखहीनोपिबाणसं
घैर्ने वनजायाचौर्यकरोसोवोवतुजानकीकांतः ४ हरिरामंगुरुंनत्वाभास्करप्रीतयेमया पीयूषलहरी
व्याख्याक्रियतेहियथामति ५ अत्रैवंश्रूयते कविर्जगन्नाथोदिल्लीवल्लभाश्रितस्तद्यवनीसंसर्गदोष
भाक्सन्गंगायाः सकाशात् द्विपंचाशत्सोपानांतरितनिजगृहेस्थितः सन् तत्रैवजान्हव्यागमनस्पर्शनेना
त्मशुद्धिंकामयमानःसन् काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये सद्यःपरनिर्वृतयेकांतासं
मिततयोपदेशयुजइतिकाव्यप्रकाशोक्तेः शिवेतरक्षतिफलकगंगास्तुतिरूपं काव्यंचिकीर्षुर्विघ्नविघाता
य वस्तुनिर्देशात्मकंमंगलमाचरन् स्वाभिमतंप्रार्थयते समृद्धमिति भोगंगे नेनव युष्मदः षष्ठ्येकवच

नविशिष्टस्य तेमयावेकवचनस्येति तेआदेशः युष्मदर्थश्चसंबोध्यः युष्मदः संबोध्यः स्वतंत्रः कर्ता अस्म
दोवाच्यः इत्यभियुक्तोक्तेरित्याद्यन्यत्राविस्तरः तत्सलिलम् सलति भक्तजनपापादिनाशायगच्छतीति स
लिलंजलम् षलगतौ सलिकलीत्युणादिसूत्रेणलच् सलिलंकमलंजलमित्यमरः एवंचाशिवशमनप्रार्थ
नंयुक्तमितिभावः नः अस्माकमाशिवमकल्याणम् शमयतु नाशयतु प्रार्थनायांलोट् तत्किम् यत्सलि
लंसकलवसुधायाः सकलाचासौवसुधाचसोर्वीतस्याः वसुधोर्वीवसुंधरेत्यमरः यद्वाकलाभिः सहितासक

समृद्धंसौभाग्यंसकलवसुधायाःकिमपितन्माहेश्वर्यंलीलाजनितजगतःखंडपरशोः

लावसुधनंधत्तेइतिवसुधासकलाचासौवसुधाच तस्याःकिमपि अनिर्वचनीयममौल्यंवा समृद्धं बहुसौ
भाग्यंशोभादायकम् अतिचतुरायाः सधनाया अपिपृथिव्याः गंगासलिलंविनानशोभेति लोकेऽपि अ
तिचतुरायास्ताटंकनूपुराद्यलंकारसहिताया अपिप्रमदायाः कुंकुमकृष्णमणिभिर्विनानशोभाभवती
त्यापामरप्रसिद्धं पुनस्तत्किम् यत् लीलाजनितजगतः लीलयाविलासेन नतुश्रमेणजनितानिउत्पा

दितानिजगंति चतुर्दशभुवनानियेनसः तस्य खंडपरशोः खंडयतिरिपून्हिनस्तीतिखंडः तादृशः परशुः शस्त्रविशेषोयस्यभूतेशस्य भूतेशः खंडपरशुरित्यमरः महैश्वर्यंमहच्चतदैश्वर्यंचमहाविभूतिभूतम् विभूतिर्भूतिरैश्वर्यमित्यमरः सन्महदितिसमासेआत्‌ महादित्यात्वेवृद्धिः गंगासलिलमात्रसहायेनेश्वरेणविलासादेवचतुर्दशभुवनानिकृतानीतिभावः लोकेपिकधनधनेसहायेसति ज्ञीडयाब्रह्मपुर्यादिकंनिर्मातीतिप्रसिद्धम् पुनस्तत्किम् यत्श्रुतीनां श्रूयतेधर्मोयाभिस्ताः श्रुतयः चत्वारोवेदाः भुजजीत्यादिनाक्तिन्

श्रुतीनांसर्वस्वंसुकृतमथमूर्तंसुमनसांसुधासौंदर्यंतेसलिलमशिवंनःशमयतु १

श्रुतिःस्त्रीवेदआम्नायइत्यमरः तेषांसर्वस्वंसर्वंचतत्स्वंचसर्वस्वं इदमेववेदानांधनमितिभावः यद्वा सर्वंचतत्स्वंच आत्मा इदंसलिलमेववेदानामात्मेतिभावः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियांधनइत्यमरः पुनस्तत्किम् अथयत्सुमनसांसुपर्वणाम् सुपर्वाणः सुमनसइत्यमरः मूर्तंसशरीरम्सुकृतंपुण्यम् स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषइत्यमरः पुनस्तत्किम् यत्सुधासौंदर्यंस

धेवामृतमिवसौंदर्यंयस्यतत् अतिशुभ्रमित्यर्थः मधुरास्वादं चिरजीवित्वादितत्कार्यकारीतिवा यद्वा सुधा
सौंदर्यमितिवापाठः सुधेतिपृथक्पदम् चंद्रोसुखमितिवत्सलिलविशेषणम् पुनः॰ सौंदर्यम् सम्यक्कंद
रीहिमाचलकंदरंतत्रभवंसोदरम् भवार्थेऽण् सोदरमेवसौंदर्यमिति चातुर्वर्ण्यादित्वात् ष्यञ् आदौ
हिमाचलेप्रकाशितमितिभावः अथवासुधायाः सौंदर्यमिवात्मरूपम् सोदराद्यदितियः अत्रदरस्मितमि
तिश्लोकपर्यंतंशिखरिणीछंदः तल्लक्षणंतु रसैरुद्रैश्छिन्नायमनसभलागः शिखरिणीइत्तरत्नाकरोक्तं
शिखरिणीय्मौन्स्भौग्लौगृतुरुद्राइतिपिंगलंचबोद्धव्यम् ननुछंदोंतरंत्यक्त्वानेनैवछंदसाकिमितिव
र्णनमितिचेत् अत्रोच्यते शिखरिणीछंदसिजलदेवताकयगणस्यादौसत्वेन जलस्पर्शे रूपाभिमतफ
लसिद्धिर्भविष्यतीत्याशयेन अशोकवनितान्यायेनवेतिकृतधियोविदांकुर्वंतु तदुक्तम् मोभूमिः
श्रियमातनोतियजलंवृद्धीरवन्हिर्मृतिंसोवायुः परदेशदूरगमनंतव्योमशून्यंफलम् जःसूर्योरुजम
दधातिविपुलांभेंदुर्यशोनिर्मलंनोनाकः सुखमीप्सितंफलमिदंप्राहुर्गणानांबुधाइति किमपितत् इत्ये
कंपदंवा किमपि अनिर्वचनीयंमोक्षप्राप्तिरूपंफलंतनोति विस्तारयतीति किमपितत् ननुविस्तारेक्षि

२

धातुवङ् घोत्तुंगाः उन्नताः एताद्दशास्तरंगाः ऊर्मयः भंगस्तरंगऊर्मिर्वेत्यमरः भवतां भक्तजनानांदुरितभय
भंगाय दुरितंचभयंचतयोर्भंगायनाशायक्रियार्थोपपदेतिचतुर्थी भवंतु आशिषिलोट् कथंभूतास्तरंगाः
उदंचन्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः हेशिवे रंबतेशब्दकरोति
इतिसप्तम्याअलुक् हः शंकरेहरौहंसेरणरोमांचवाजिषु इतिनानार्थमंजरी अबिरबिशब्दे पचाद्यच् त
त्पुरुषे कृतीतिसप्तम्याअलुक् अप्येकदंतहेरंबलंबोदरगजाननाइत्यमरः हेरंबस्यजननी माता पार्वती

(अपिप्राग्गाविद्याद्रुमदलनदीक्षागुरुरिह भवाहस्तेवारांश्रियमयमपारांदिशतुनः २) उदंच
न्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः तस्याः कटाक्षाः अपां

गदर्शनानि कटाक्षोपांगदर्शनमित्यमरः स्फुटंचतत्कपटंचव्याजंच कपटोस्त्रीव्याजेत्यमरः स्फुटकपटेनहेरंब
जननीकटाक्षाः उदंचन् उदयंप्राप्नुवन् योमार्तंडः अर्कः विकर्तनार्कमार्तंडइत्यमरः उदंचन्मार्तंडवत् स्फुटक
पटहेरंबजननीकटाक्षाः अतिरक्ताइत्यर्थः तेषांव्याक्षेपः विलंबः चिरकालपर्यंतंकटाक्षस्थितिरित्यर्थः यद्वा



387

व्यासेपः संबंधः तेन क्षणंक्षणपर्यंतंजनितः उत्पादितः ताद्दशः संक्षोभनिवहोभयसमूहोयेषांते पुनः कथं
भूताः अतएवहरशिरसिस्वाधारभूतेमहादेवमस्तके त्वंगंतः कंपंतः इतस्ततोगच्छंतोवा त्वगिकंपनेइत्य
स्मात् उरवउरवीतिदंडके पठितगमनार्थकत्वात् उभयार्थकत्वं क्वचित्तु उदंचन्मात्सर्येतिपाठः तत्रसापत्न्य
भावादुदंचन्मात्सर्येणेतिव्याख्येयम् ३ इदानींत्वदाश्रयान्मयासर्वेस्मरास्तृणप्रायीकृताः अधुनायदि

भवंतुत्वंगंतोहरशिरसिगंगातनुभुवस्तरंगाः शोत्तुंगादुरितभयभंगायभवताम् ३ तवा
लंबादंबस्फुरदलघुगर्वेणसहसामयासर्वेवज्ञासरणिमथनीताः सुरगणाः त्वमेकार्यकरणेउदा

सीनातर्हि अहं केषामग्रेरोदनंकरोमीत्याह तवेति भो अंब जननि अंबार्थनद्योरिति ह्रस्वः तवालंबादाश्र
यात्स्फुरदलघुगर्वेण स्फुरन् देदीप्यमानः अलघुर्महान्गर्वोहंकारोयस्यतेन मयासर्वेसुरगणाः अवज्ञा
सरणिं अवज्ञायाःअवहेलनस्यसरणिस्तांसहसाअविचारेणनीताः प्रापिताः अत्रप्रधानकर्मण्याख्येयेला
दीनाद्दुहिकर्मणामितिभाष्योक्तेः सुरगणरूपेप्रधानकर्मणिक्तः अतएवाभिहितत्वात्तत्रप्रथमेतिदिक् भो

भागीरथि भगीरथस्येयंभागीरथीतत्संबोधनम् तस्येदमित्यणिटिड्ढाणेतिङीप् इदानीमुद्धारसमयेयदि औ
दास्यंउदासीनत्वं उद्धारानुकूलव्यापारशून्यत्वमित्यर्थः भजसिअंगीकरोषि तदातर्हिनिराधारः निर्गतः आ
धारोयस्यसः एतादृशो हमिहलोकेकेषांपुरः अग्रेरोदिमिरोदनंकरोमि हाइतिकष्टे खेदेवा इतित्वंकथय वद
रुदिर् अश्रुविमोचने रुदादिभ्यः सार्वधातुकेइतीट् देवानामवहेलनात्तैः त्यक्तः त्वमपि अस्मिन्समयेयदि
त्यजसि तर्हिमेकागतिरिति त्वमेवकथयेतिभावः ४ पुनरपिभवाहरूपंस्मरन् पापहरणंप्रार्थयते स्मृतिमि

इदानीमौदास्यंभजसियदिभागीरथितदानिराधारोहारोदिमिकथयकेषामिहपुरः ४ स्मृतिंया
ताप्युंसामकृतसुकृतानामपिचयाहरत्यंतस्त्वंद्रांतिमिरमिवचंद्रांशुसरणिः ति हेगंगे तवभवाहरूपाम्

र्तिः अकृतसुकृतानां अतीताद्यतनजन्मसुकृतपातकानांपुरुषाणामपिस्मृतिंस्मरणंयातालाभमासती चंद्रां
शुसरणिः चंद्रस्यांशवः किरणाः तेषांसरणिः पंक्तिः सरणिःपद्धतिरित्यमरः तिमिरं अंधकारंयथातथांतस्त्वं
द्रांअंतःकरणाज्ञानालस्यंनाशयति यथा चंद्रोदयेन तमोनश्यति तथातवस्मरणेनमहापातकिनांतत्सदृशां



389

नांपातकं नश्यति पुन० मूर्तिः सकलाः सुराः देवाः तैः संसेव्यसलिला सेवनीयजला एतादृशी ते मूर्तिः म मांतः संतापं अंतः करणस्थं त्रिविधं कायिकवाचिकमानसिकरूपं पापं च नरकृतं संतापमाधिभूताध्यात्मा धिदैवं वा हरतात् तथा जाते जन्ममरणकष्टान्मुक्तः स्यामिति भावः ५ इदानीं राज्यत्यागपूर्वकं त्वत्तीरवा सिनां त्वंभः पानेन जायमान आनंदः ततोन्यूनसुखं मोक्षमुपहसतीत्याह अपीति भोजननिभाज्यगपिप्रभूतमपि प्रभूतं प्रचुरं भाज्यमित्यमरः समुद्रांतमपीत्यर्थः एतादृशं राज्यं राज्ञः कर्म पुरोहितादित्वाद्यक् प्रजापालना

इयं सा ते मूर्तिः सकलसुरसंसेव्यसलिला ममांतः संतापं त्रिविधमपि पापं च हरतां ५ अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा विलोलद्वानीरं तव जननि तीरं श्रितवताम्

त्यक्तं सहसा तृणमिव परि त्यज्य अनेन लोभाभावः सूचितः विलोलद्वानीरं विलोलं तः वायुना चंचलाः वानीराः वेतसवृक्षाः यस्मिन् त द्वेतसपर्याये रथाभ्रपुष्पविदुलशीतवानीरवंजुला इत्यमरः अनेन छायानिबिडत्वं सूचितम् एतादृश तव तीरं कूलं रोधश्च तीरं चेत्यमरः श्रितवतां सेवतां क्तवतुः प्रत्ययान्तः अमृतात् पंचम्यांतात्तसिलस्वादीयः सलिलम

391

त् षष्ठी तथाचकोशः पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति ददानादात्रीनल्लोपेतिषष्ठीनिषेधात् पद
द्वितीया एतादृशीत्वंइहलोके केनतुलनीयाउपमेयासीतिनः अस्मान् कथयवद तादृशस्य कस्याप्यभावान्
नाप्युपमेयासीतिभावः यद्वा केनब्रह्मणातुलनीयासि अपितु नेत्यर्थः ब्रह्मणोपि तादृशसामर्थ्याभावादि
भावः तुलनिष्कर्षइतिधातोरनीयर् विष्णुरूपंवस्त्विति पक्षेसारूप्यमुक्तिः प्रतीयते तदुक्तंश्रीमच्छंकराचार्यैः
न्मध्याङ्गुलांछनोगरुडगः पीतांबरोनिर्गतः नारायणंवाशिवंवाइतिवेतितत्किं यद्विष्णुपदंमहादानैः गजाश्व

अचिंत्यंतद्विष्णोःपदमखिलसाधारणतयाददानाकेनासित्वमिहतुलनीयाकथयनः ११ शिविकाद्

लादिरूपैः ध्यानैः चित्तैकाग्रतयाचिंतनैः अपिनबहुविधवितानैरपिन बहुविधाः अनेकप्रकाराः येवितानाः क्रतवः क्रतु
विस्तारयोरस्त्रीवितानंत्रिषुतुच्छकइत्यमरः बहुविधाः येवितानाउल्लोचास्तैः अस्त्रीवितानउल्लोचेत्यमरः घोराभि
भयंकराभिः परमकष्टसाध्याभिर्वा स्फटिमलतपोराशिभिरपि स्फुटिमलानिनिर्मलानि नतुमारणोच्चाटनवशीकरण
जनकानितादृशानियानितपांसि तेषांराशयः समूहाः तैरपिनलभ्यंनप्राप्यम् अर्हार्थलभधातोःपोरदुपधादि

यत् पुनस्तत्किम् अचिंत्यंचिंतानर्हंवागगोचरमितिभावः ११ इदानींदर्शनमात्रेणनृणांसंसारभयहंत्रीं
त्वांशिवः पार्वत्यनुरोधत्यागपूर्वकंनिरंतरंशिरसिबिभर्तीत्याह नृणामिति भोभागीरथि तेतवमूर्तेः तनो
महिमानंपरमदुर्घटकार्यकर्तृत्वरूपंमाहात्म्यंइहलोकेकः निगदतु वदतु अपितुनकोपीत्यर्थः माहात्म्यबाहुल्ये
न कस्यापिवाणीप्रसराभावादितिभावः कथंभूतायाः मूर्तेः ईक्षामात्रादपि ईक्षैवईक्षामात्रमितिमयू

नृणामीक्षामात्रा दपिपरिहरंत्याभवभयं
शिवायास्तेमूर्तेः कइहमहिमानंनिगदितु ॥

रव्यंसकात्समासः मात्रंकार्त्स्न्येवधारणेइतिकोशादवधारणंमात्रशब्दार्थः तस्मादपिनृणांनृचेत्यर
वैकल्पिकत्वाद्दीर्घाभावः भवभयंभवात्संसाराद्भयम् हरंत्याः तदुक्तं गंगेत्वद्दर्शनान्मुक्तिर्नजानेस्ना
नजंफलमिति पुनः कथंभूतायाः शिवायाः शिवयतीतिशिवा तत्करोतीतिण्यंतात्पचाद्यचिटाप् त

यद्वा शिवंकल्याणं अस्तीत्यस्याः सातस्याः यद्वा शिवो महादेवो भर्तृत्वेन अस्त्यस्याइति शिवोमोक्ष
स्याइति पक्षचतुष्टयेपि अर्शआद्यच् शिवोमोक्षे महादेवोरूस्वक्षेमेजले शिवमितिशाश्वतः श्रीकंठः कपर्द
ग्रः कपर्दी श्रीकंठः शितिकंठः कपालभृदित्यमरः अमर्षम्लानायाः अमर्षेण कोपेन कोपक्रोधामर्षरोषइत्य
रः म्लानाग्लानातस्याः एतादृशः गिरिभुवः गिरेर्हिमाचलात् भवतीतिगिरिभूः पार्वती क्विप् तस्याःप

अमर्षम्लानायाः परमननुरोधागिरिभुवो
विहायश्रीकंठःशिरसिनियतंधारयतियां १२

रूपं अनुरोधं अनुसरणं विहायत्यक्त्वायांगंगांशिरसिनियतं निरंतरं यथास्यात्तथा धारयति बिभर्ति स
र्थेणिच् सपत्नीभूतगंगायाः मस्तकधारणेनजातकोपायाः अपिपार्वत्याः सांत्वनादिकंविहायअधिकगुणव
त्तामेवशिरसिबिभर्तीतिभावः लोके अपिअतिगुणवतोहीरकस्यमस्तकधारणंप्रसिद्धमेव १२ ७

गंग

गंगाल॰
११

इदानींउन्मत्तादिभिरपिविनिंद्यानिपरिहार्याणि अवाच्यानियानिपापानितन्नाशिनीत्वमेवेत्याह विनिंद्या
नीति भोगंगेउन्मत्तैरविचारकारिभिः विशेषेणनिंद्यानिनिंदितुंयोग्यानि अपिच पतितैरपिप्रायश्चित्तादि
भिः परिहार्याणित्याज्यानि व्रात्यैः गर्भाधानादिसंस्कारहीनैः व्रात्यः संस्कारहीनः स्यादित्यमरः अव
च्यानिवक्तुमयोग्यानि पिशुनैः कर्णेजपैः कर्णेजपः सूचकः स्यात्पिशुनोदुर्जनः खलइत्यमरः सपुलकं र

विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिव्रात्यैःसपुलकमपास्यानिपिशुनैः हरंती
लोकानामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविजयसे १३

रोमांचंयथास्यात्
थाअपास्यानित्याज्यानि एतादृशानि कियतां किंपरिमाणमेषांतेकियंतः तेषां किमः संख्यापरिमाणेडति
तिचतुक् किमिदंभ्यांवोघः बहूनामित्यर्थः लोकानामेनांसियंत्यधोएभिस्तानि यंति गच्छंतिप्रायश्चित्तानि
नायातानि एनांसि कलुषाणि इण् आगसीत्यसुन् कलुषंवृजिनैनोघमित्यमरः हरंतीनाशयंती एका
कदापि कस्मिन्नपिकालेश्रांता अखिन्ना एतादृशीत्वंजगति विश्वस्मिन् विजयसे सर्वोत्कर्षेणव

लोकेकश्चन कदाचित् एवंकार्यं यदिकरोतितदाश्रांतोभवति बहुभिर्वा एकंमहत्कार्यंकृतंचेत् सर्वेश्रांताः भवंति त्वंतु अस हायाद्वितीयासर्वेषांपापानिनिरंतरंहरंत्यपिनश्रांतेतिममापिपापंदूरीकरिष्यस्येवेतिभावः १३

इदानींतवगुणानामेवायंदोषः यत्पृथ्वीतले शोकनाशायस्वर्लोकात्पतंत्यास्तवनिर्लोभोपिशिवः कपर्दस्यापि नमिषेणप्रतिग्रहंचकारेत्याह स्खलंतीति भोभागीरथि अवनितलशोकापहृतये अवन्याः पृथिव्याः तलं

स्खलंतीस्वर्लोकादवनितलशोकापहृतयेजटाजूटग्रंथौयदसिविनिबद्धापुरभिदा अयेनि र्लोभानामपिमनसिलोभंजनयतांगुणानामेवायंतवजननिदोषः परिणतः १४

स्वरूपंअधः स्वरूपयो रस्त्रीतलमित्यमरः तत्रयः शोकः तत्रापहृतिर्नाशः तस्यैवअपहृतिंकर्तुमित्यर्थः स्वर्लोकात् स्खलंतीपतंतीत्वं पु रभिदाशिवेनजटाजूटग्रंथौ जटाजूटस्यकपर्दस्यग्रंथिः तत्रयत्तद्विनिबद्धाविशेषेणनिरंतरंबद्धासि उपसर्गद्वयंक दापि अन्यत्रगमनाभावंबोधयति अयेजननि निर्लोभानामपि निर्गतः लोभोयेषांतेषामपिमनसि चित्ते लोभं इच्छांजनयतांकुर्वतां तवगुणानामेवदयादाक्षिण्यादीनामेवायंदोषः परिणतः प्रसृतः निर्लोभेनयाकदाप्यप्र

निग्रहकर्त्ताशिवः नवगुणलोभवशेनैवअपूर्वंप्रतिग्रहंचकारेतिभावः १४ इदानींसर्वेषांरक्षणदक्षमंपरमौ
षधंत्वमसीत्याह जडानिति भो अंब इह कलौ जडान् अज्ञान् क्रियासुमंदानित्यर्थः जडोज्ञइत्यमरः अं
धान् चक्षुरिंद्रियहीनान् पंगून् पादगतिहीनान् प्रकृतिबधिरान् प्रकृत्यास्वभावेनबधिरान् श्रोत्रेंद्रियही
नान् शब्दश्रवणासमर्थानित्यर्थः उक्तिविकलान् उक्तिभिर्वचनैर्विकलाःहीनाःतान् पूर्वसदृशेतिसमासः
व्याहारउक्तिर्लपितंभाषितंवचनंवचइत्यमरः वचधातोःक्तिनिवचिस्वपीतिसंप्रसारणं ग्रहग्रस्तान् ग्रहै

जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान्ग्रहग्रस्तानस्ताखिलदुरितनिस्तार
सरणीन्

रादित्यादिनवग्रहैर्ग्रस्ताःकवलिताःकृतपीडाइतियावत् तदुक्तंज्योतिःशास्त्रे स्वर्क्षा
च्चंद्रखलाग्निखारिषुशशीसप्ताद्यगोऽब्जःपुनश्चायुर्नाशव्ययधर्ममृत्युषुकविःस्यात्स्त्रिकोणेगुरुः सौम्योऽव्यं
त्ययसमेऽरविलाभवगताःशक्रेनवेषुद्विगश्चंद्रार्थौनिजभाद्भमंनवदृतंव्ययद्वीषुशेषंनसदिति अस्ताखिल
दुरितनिस्तारसरणीन् अखिलानिचतानिदुरितानिचपापानितेषांनिस्तारणंनाशनम् तस्यसरणिःमार्ग



396

श्चित्ताद्याचरणमार्गः अस्ताः विद्यमाना अखिलदुरितनिस्तारसरणिर्येषां ते तान् पापबाहुल्येन अविद्यमानप्रायश्चि
त्तादीनित्यर्थः निर्लिंपैर्देवैः अनुपसर्गाल्लिंपेति सूत्रस्थेन नौर्लिंपः संज्ञायामिति वार्तिकेन शः मुक्तान् स्वहस्तेन परि
त्राणाभावात् अपिच निरयांतर्निरयस्य नरकस्य अंते मध्ये स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः
निपततः नितरां पतनं निते निपततः तान् एतादृशान् नरान् मनुष्यान् त्रातुं त्वं परमं उत्कृष्टं भेषजं औषधमसि भेष
जौषधभेषज्यानीत्यमरः एवं च सर्वभेषजं त्वं सर्वांतर्गतस्य ममापि भेषजं भविष्यस्येवेति भावः १५ इदानीं क

निर्लिंपैर्निर्मुक्तान् अपि च निरयांतर्निपततो नरानंब त्रातुं त्वमिह परमं भेषजमसि १५ स्वभावस्वच्छा
नां सहजशिशिरायामयसणाम् अपारस्तेमानर्जयंति महिमा कोपि जगति॥ पिलसुनिनिर्दग्धाः त्वत्संबं

धवशात् स्वर्गे दिव्यदेहधारिणः सगरजाः सगरपुत्राः अद्यापि तव महिमानं अहो धन्या जान्हवी निधनं गता अ
पि सयं यत्संगवशादीदृशा जाता इत्याकारकं गायंतीत्याह स्वभावेति भो मातः स्वभावस्वच्छानां स्वभावेन निस
र्गेण न तु कृत्रिमेण स्वरूपं च स्वभावश्च निसर्गश्चापि च पुर्णित्यमरः स्वच्छानां निर्मलानां सहजमनायासेन मणि

गंगाल.
१३

कायसंक्षेपेण शिशिराणां शीतलानां उक्तंच कालिदासेन शैत्यंहियत्सामकृतिर्जलस्येति एतादृशीनांते अपांवा
राम् आपः स्त्रीभूम्निवार्वारिइत्यमरः अपारः अमर्यादः अयंकोपिविलक्षणोमहिमामाहात्म्यं जगतिजयतिसर्व
वोत्कर्षेणवर्तते सगरजाः सगरराजपुत्राः अनवद्याकृतिभृतः संतः न अवद्यागर्ह्या अनवद्यास्तत्या अवद्यपण्ये
तिसूत्रेण गर्हायां अवद्येतिनिपातितम् तादृशी चासौ आकृतिश्चतांबिभ्रतितेतेएतादृशाः संतः अतएवस्फुटपुलक
सांद्राः संतः स्फुटाः प्रकटाः येपुलकाः रोमांचाः तैः सांद्राः निबिडाः संतः महिमानं अद्यापिमुदाप्रीत्यागायंतिव

मुदायंगायंतिद्युतलमनवद्याकृतिभृतः समासाद्याद्यापिस्फुटपुलकसांद्राः सगरजाः १६

दंतीत्यर्थः किंकृत्वा द्युतलंदिवस्तलम् दिवउदित्युत् द्योदिवौद्वेस्त्रियामित्यमरः समासाद्य अधिष्ठित्यसगरेण
हि अश्वमेधकरणायअश्वोविनिर्मुक्तः तत्संरक्षणायस्वपुत्राः नियुक्ताः स अश्वः इंद्रेणचौर्येणपातालेनी
तः सगरपुत्राः अपितदानयनायतत्रगताः तेसर्वेकपिलेननिर्दग्धाः पश्चात् भगीरथेनस्वर्गात् गंगामानीय
जीविताइति स्पष्टंरामायणादौ १६ इदानींस्वल्पपापिनांदोषापनुत्तयेभिजगतिगोदावर्यादीनिबहूनितीः

टीका.
१३

र्थानिसंति अतीतप्रायश्चित्तानांतुदोषहरणेत्वत्सदृशीत्वमेवसमर्थेत्याह कृतेति भोजननिकृतकृच्छ्रैनस्कान्
कृतानिक्षुद्राणिअल्पानिपलांडुभक्षणादीनिएनांसिपापानियैस्तेतान् शेषाद्विभाषेतिकप् अथपापाचरणानंत
रंझटितिशीघ्रंसंततसमनसः संततंसंपश्चात्तापयुक्तं मनोयेषांते तान् एतादृशान् नरान् समुद्धर्तुं आचरितपापात् दूरी
कर्तुं त्रिभुवनतले त्रयाणांभुवनानांसमाहारस्त्रिभुवनं तद्धितार्थेतिसमाहारेद्विगुः पात्रादित्वात्स्त्रीत्वाभावः
तस्यतलं तत्रतीर्थनिवहाः तीर्थानांगोदावर्यादितीर्थानांनिवहाः समूहाः संतिवर्तंते भोजननिप्रायश्चित्तप्रसर

कृतकृच्छ्रैनस्कानथझटितिसंततसमनसः समुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः णपथातीतचरितान्

प्रायश्चित्तस्यपापनाशनसमर्थधर्मविशेषस्यप्रसरणमाचरणंतस्यपंथामार्गः वाटः पंथाश्चमार्गश्चेतित्रिकांडमंड
नः ऋक्पूरब्धेतिसमासांतोअप्रत्ययः प्रायश्चित्तप्रसरणपथान् अतीतं अत्यंतंगतंचरितंयेषांते तानपि बहुका
लं बुद्धिपूर्वकंमहत्पापाचरणेन अविद्यमानप्रायश्चित्तानपीत्यर्थः उक्तंचसुमंगलाचार्यैः स्फुकृतिनईषत्तापे प्रायश्चि
त्तंरघूत्तमप्रोक्तम् अपयातिमासुदीक्ष्यप्रायस्तदपीहगौरिवव्याघ्रमिति एतादृशानपिनरान्दूरीकर्तुंआचरितपा

पादुद्धर्तुं त्वमिवत्वत्सदृशी त्वमेव विजयसे अत्रोपमानोपमेयत्वं गंगायाएव तत्फलं तु अन्यात्वत्सदृशीनास्ती
ति अतएवात्रानन्वयालंकारः तदुक्तम् उपमानोपमेयत्वं यदेकस्यैववस्तुनः इंदुरिंदुरिवश्रीमानित्यादौतदन
न्वय इति प्रायश्चित्तशब्दे प्रायस्यचित्तिचित्तयोरितिपारस्करगणपठितसूत्रेणसुटनिष्पन्नः सचरूढ्यायोगेन
चपापनाशनसमर्थं विशेषधर्ममाचष्टे प्रायश्चित्तशब्दश्चायंपापक्षयार्थेनैमित्तिके कर्मविशेषेरूढ इत्याहुः संप्र
दायविदोनिबंधकारादयः योगस्त्वांगिरसादर्शितः प्रायोनामतपः प्रोक्तंचित्तंनिश्चयउच्यते तपोनिश्चयसंयुक्तं

अपिप्रायश्चित्तप्रसरणपथातीतचरितान्नरान्दूरीकर्तुं त्वमिवजननित्वंविजयसे १७
निधानंधर्माणांकिमपिचविधानंनवमुदांप्रधानंतीर्थानाममलपरिधानंत्रिजगतः ॥

प्रायश्चित्तंतदुच्यते अस्यार्थः अनुष्ठितेनद्वादशवार्षिकादिना अवश्यंपापंनिव र्ततइतिविश्वासोनिश्चयः तेनसं
युक्तंव्रतानुष्ठानलक्षणं तपः प्रायश्चित्तमित्यलंविस्तरेण १७ इदानीमनेकगुणविशिष्टत्वेनपापहरणक्षमंनवव
धुर्मसपापंनाशयत्विति प्रार्थयते निधानमिति भोजननि धर्माणांवेदेनप्रयोजनमुद्दिश्यविधीयमानार्थानां तदुक्तं
जैमिनिना चोदनालक्षणोर्थोधर्मस्तेषांनिधानंस्थानंनिधीयतेस्थाप्यतेयस्मिन्नितिधाधातोः करणाधिकरणयोश्चे

तिल्युद् चपुनः नवसुदांनवाभ्युताः सुदभ्युतासांनूतनहर्षाणांकिमपिविधानंजनकं गंगादर्शनेनधिलक्षणाहर्षाज्जा
यंतेइत्यनुभवसिद्धं कर्तृकर्मणोरिति कर्मणिषष्ठीउभयप्राप्तचपुनः तीर्थानांमधानं चपुनः त्रिजगतः त्रयाणांजगतां
समाहारः त्रिजगत् तस्यतद्धितार्थेतिसमाहारेद्विगुः अमलपरिधानं अमलंनिर्मलंचतत्परिधानंचामलपरिधा
नं अधोंशुकं अंतरीयोपसव्यानपरिधानान्यधोंशुकइत्यमरः यथालोकेकस्यचिद्वसनहीनस्यनशोभातत
थाएतद्विनात्रिजगतीत्याकूतं चपुनःबुद्धेर्मनीषायाः बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतिरित्यमरःसमा

समाधानंबुद्धेरथरवलुतिरोधानमधियांश्रियामाधानंनः परिहरतुतापंतववपुः १८

धानंनानादुष्टकल्पनानाशकमित्यर्थः अथानंतरम् अधियांनिर्बुद्धीनांतिरोधानं अपिधानं तेषामदृश्यमिति
भावः अपिधानतिरोधानपिधानाच्छादनानिचेत्यमरः अथश्रियांलक्ष्म्यामाधानंस्थापकम् मोक्षादिलक्ष्मीसंपा
दकमित्यर्थःएतादृशगुणविशिष्टंतववपुः शरीरंगात्रंवपुः संहननंशरीरमित्यमरःनःअस्माकंतापंपरिहरतु १८



५०।

इदानींकार्यासक्तत्वात्पायः तववियोगोजातः अयंममैवापराधइत्याह पुरइति भोमातः मातृत्वेनापराधः सोढ
व्यइत्याकूतं एवंममैवएषनिश्चयार्थः मंतुः अपराधः अस्तीतिशेषः कोसावित्याकांक्षायामाह इहलोके तववियो
गः स्नानाद्यसंबंधः यत् अभूत् अतःकारणात् क्षणमपिक्षणमात्रमपिकरुणादयात्वयामयिकर्तव्येतिशेषः का
रुण्यं करुणाघृणेत्यमरः अपराधभवनेमूलमाह कथंभूतस्यममद्रविणमदिराघूर्णितदृशांद्रविणमेवमदिरा

पुरोधावंधावंद्रविणमदिराघूर्णितदृशांमहीपानांनानातरुणतरखेदस्यनियतम्

उन्मादकारित्वात् यद्वा द्रविणंचमदिराचताभ्यांघूर्णिते घूर्णनयुक्तेभ्रमितइत्यर्थः तादृश्योदृशोयेषांते दृकदृ
ष्टीचेत्यमरः नानाअनेकेषांअव्ययत्वात् षष्ठ्यालुक् एतादृशानांमहीपानांमहीं पांतितेमहीपाः राजानःते
षां अग्येनियतमेव धावंधावंधावित्वाधावित्वा धावुगतिशुद्ध्योरितिधातोराभीक्ष्ण्येणमुल् चेति णमुलिद्वि
त्वं तरुणतरखेदस्य अतिशयेनतरुणः तरुणतरः तादृशः खेदः श्रमोयस्य तस्य यद्वानानातरुणतरखेदस्ये

त्येकं पदम् नाना अनेकविषयः तरुणतरः खेदोयस्य पुनः कथंभूतस्य स्वहितशतहंतुः स्वस्यैवहितानि पथ्या
नितेषांशतं तस्यहंतानाशकः तस्य अतएवपुनः कथंभूतस्यजडधियः जडाधीर्यस्यतस्य १९ पूर्वंदयाविधेयत्यु
क्तं इदानींकिंविषयिणीदयेत्याकांक्षायांतवजलंममपुनः भवनमेवदूरीकरोतुइतिप्रार्थयते मरुदिति भोमा
तः तेतवजलं ममजगन्नाथस्यजननजालंजननस्यजन्मनः जनुर्जननजन्मानीत्यमरः तस्यजालंसमूहः तत्र जालं
समूह अनायइत्यमरः जरयतुनाशयतु जॄवयोहानौस्वार्थेणिजंतः जनीजॄष्वइतिमित्वेमितांह्रस्वइत्युपधाह्रस्वःक

मभेवायंमंतुःस्वहितशतहंतुर्जडधियोवियोगस्तेमातर्यदिहकरुणालःक्षणमपि १९ मरुल्लीला
लोलल्लहरिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौंकमरुचि

थंभूतंजलं मरुल्लीलालोलल्लहरिलुलितांभोजपटली ———— स्खलत्पांसुव्रातच्छुरणविसरत्कौंकुमरुचि
मरुतः वायोः लीलाविलासः तेनलोलंत्यश्चंचला यालहर्यः वीचयः ताभिः लुलितानिलोलानियानि अंभोजानि
कमलानितेषांपटलीसमूहः तस्याः स्खलंतः पतंतोयेपांसवः रजांसितेषां व्रातः समूहः तस्यच्छुरणंअंगलेपः तेन
विसरंतीप्रसरणशीलातादृशीकौंकुमरुचिर्दीप्तिर्यस्यतत कमलरजः पतनेनात्यंतसारक्तमितिभावः पु० सुरस्त्री

वक्षोजक्षरदगरुजंबालजटिलंस्फराणामिंद्रादिदेवानांस्त्रियः इंद्राण्यादयः तासांवक्षोजाः स्तनाः तेभ्यः क्षरन्
पतन्नयः अगरुजंबालः कृष्णचंदनपंकः वंशकागरुराजार्हेत्यमरः निषद्वरस्तुजंबालः पंकांस्त्रीत्यमरः तेनजटि
लंसजटंजटाशब्दात्तुदादित्वादिलच् पुं॰ जंबालंजंबालः पंकः अस्तियस्मिन्तत् यद्वाजंबालः शेवालं अस्तिय
स्मिन् यद्वाजंबालाः सदनद्रुमाः धत्तूरवृक्षाइत्यर्थः तेसंत्यस्मिन्नतत् तथाचकोशःजंबालः शैवलेपंकेजगलेमदन

सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलंजलंतेजंबालंमममजन नूजालंजरयतु २० समुत्पत्तिःप
द्मारमणपदपद्मामलनखान्निवासः कंदर्पप्रतिभटजटाजूटभवने

द्रुमइतिपर्यायेपिजंबालशब्दान्म
त्वर्थीयो अर्शआद्यच्मरुच्छीलालोलल्लहरीत्यन्नसंहितायांतोर्लीतिलः कौंकुमरुच्योः समासंकुल्ल पद्माद्भिसरं
तीशब्देनसमासेपुंवद्भावः तालव्याअपिदंत्यास्थशंबुसूकरपांसवः इतिद्विरूपकोशात्तालव्योपिपांशुशब्दः २० इदानींमुत्पत्तिस्था
ननिवासस्थानव्यापारसौष्ठवेनजगदपेक्षयातवउत्कर्षोवर्ततइति आह समुत्पत्तिरिति भोजननि जगतः विश्वस्मा
त्तवोत्कर्षः आधिक्यं कस्माद्धेतो र्नजागर्तुनास्त्याम् अपितु सर्वस्माद्धेतोरुत्कर्षोवर्ततइत्यर्थः उत्कर्षप्रतिपादक

हेतूनाह समुत्पत्तिरिति तवसमुत्पत्तिः सम्यगुत्पत्तिः उद्भवः पद्मारमणपदपद्मामलनखात् पद्मायाः लक्ष्म्याः
लक्ष्मीः पद्मालयापद्मेत्यमरः रमणः पतिः विष्णुः तस्य पदं चरणकमलं तस्यामलनखः तस्माद्भवतिजनिकर्तुरित्य
पादानत्वम् तवनिवासःस्थितिः कंदर्पप्रतिभटजटाजूटभवने कंदर्पस्यानंगस्य कंदर्पोदर्पकोनंगइत्यमरः प्र
तिभटः प्रतिपक्षीशिवः तस्यजटाजूटः कपर्दः सएवभवनंगृहं तत्रवर्ततइतिशेषः अथानंतरं तवायंव्यासंगः उ

अथायंव्यासंगोहतपतितनिस्तारणविधौनकस्मादुत्कर्षस्तवजननिजागर्तिजगति २१ नगेभ्यो
यांतीनांकथयतटिनीनांकतमयापुराणांसंहर्तुः सुरधुनिकपर्दोधिरुरुहे॥ द्योगः हतपतितनिस्तार

णविधौ हताः शत्रुभिः शस्त्रादिनामारिताः प्रायश्चित्तिनः तेषांनिस्तारणंउद्धारः तस्याविधिः करणंतत्रवर्ततइतिशे
षः विधिर्विधानेदैवेचेत्यमरः २१ इदानींहरशिरसिनिवसंत्याःविष्णुपदोद्भूतायाः तवोपमेयाकापिनंदीनास्तीत्या
ह नगेभ्यइति भोजननि कविभिः पंडितैः संख्यावान्पंडितः कविरित्यमरः तवतुलालेशः तुलायाः उपमायाः
लेशः लवः लवलेशकणाणवइत्यमरः यस्यांदीयेत तादृशीकाचवर्तते अपितुनकापीत्यर्थः ननुकृष्णादयोपिव्द्योव

र्त्तेतेइतिचेत्तत्राह नगेभ्यइति नगेभ्यः पर्वतेभ्यः नगोप्राणिष्वन्यतरस्यामितिपाक्षिकप्रतिभान्नत्रोनलोपाभावः
यांतीनामागच्छंतीनांमध्येयतश्चनिर्धारणमितिषष्ठी कतमयातटिन्यापुराणांनगरणांसंहर्त्तुर्दाहकस्यशिव
स्यकपर्दः जटाजूटः अधिरुरुहे अध्यारूढः नगेभ्योयांतीनांतटिनीनांमध्येकयावातटिन्याश्रीभर्तुःविष्णोःपद
कमलंचरणपंकजंसलिलैः अक्षालिधौतमितित्वंकथय अर्थात् अस्मान्प्रतिवद एवंच तत्कार्यकारणाभावात्

कयाचश्रीभर्तुः पदकमलमक्षालिसलिलैस्तुलालेशोयस्यांनवजननिदीयेतकविभिः २२ विध
त्तांन्निःशंकंनिरवधिसमाधिंविधिरहोसुखंशेषेशेतांहरिरविरतंनृत्यतुहरः ॥

काप्युपमेयानेतिभावः
इदमेवमनसिनिधायत्वामहंशरणंगतइत्याकूतं अक्षालीत्यत्रचिण्भावकर्मणोरितिकर्मणिचिण् आदौपूर्वार्द्धं
योजयित्वापश्चादुत्तरार्द्धंयोज्यम् २२ इदानींमेवंजननिमनोरथदायिनित्वयिसत्यांब्रह्मादीनांप्रयोजनमेवनास्ती
त्याह विधत्तामिति भोजननि जनयतिविश्वमुत्पादयतिइति जननीविश्वमाता तत्संबोधनं जगतिविश्वस्मि
न् कामानांमनोरथानांकर्मणिषष्ठी सवित्रीउत्पादयित्रीयदिजननीविश्वमाता त्वंजागर्त्ति अस्तितर्हिविधिः

विदधाति विश्वमिति विधिः ब्रह्मा विधाञो वेधचेति वेधादेशोऽसिप्रत्ययश्च निरवधिसमाधिं निगर्तः अवधि
र्यामादिरूपा मर्यादा यस्य तादृशो यः समाधिः चित्तवृत्तिनिरोधस्तं निःशंकं निर्गताशंका यस्मिन् कर्मणि यथा
भवति तथा मयि निर्व्यापारे जगदुत्पत्तिः कथं भविष्यतीति शंकारहितमित्यर्थः विधत्तां करोतु हरिः हरति सर्वे
षां दुःखमिति हरिः अचइ इरित्यौणादिको इः शेषे स्फरवं यथा स्यात्तथा शेते नाम् निद्रां करोतु सुखमित्यनेन निद्राभं
गजनकः जगद्रक्षणरूपोपाधिः मास्त्विति सूचितम् हरः हरति विश्वमिति हरः पचाद्यच् शिवः अविरतं निरं

कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः सवित्री कामानां यदि जगति जागर्ति भवति २३

तरं यथा स्यात्तथा नृत्यतु नृत्यं करोतु अविरतमित्यनेन मध्ये कार्यांतरचिंततया नृत्यविरामो मास्त्विति सूचितं प्रा
यश्चित्तैः कृतं स्वहस्तेन शुद्धिकरणाभावात्तानि व्यर्थानीति भावः अथानंतरं तपोदानयजनैः तपांसि कृच्छ्रचां
द्रायणादीनि दानानि गजाश्वादीनि यजनानि देवपूजा यागादीनि तैरलम् तैः साध्यं नास्तीति भावः गम्यमानक्रि
याप्रतिकारकत्वात् तृतीया अहो इत्याश्चर्ये अनेकेषां कार्यमेकेव त्वं करोषीत्याश्चर्यम् २३ ७ ७



407

इदानींअनाथइत्यादिविशेषयुक्तोहं स्नेहार्द्रामित्यादिविशेषणयुक्तांत्वांप्राप्तोस्मि अतस्त्वंस्वमहत्त्वयोग्यंकु
र्विष्वाङ् अनाथइति भोगंगे अयमर्भशिशुः श्यतिदिनेदिने कृशोभवतीतिशिशुः शावकः शःकिस्सन्वच्चेत्या
दिसूत्रेणसाधुः पृथुकः शावकःशिशुरित्यमरः मातरंजननींत्वांप्राप्तोस्मिइहविषयेत्वंसमुचितंसम्यगुचितंयो
ग्यंविदध्याः कुरुशरणागतत्राणंमांमातृत्वान्मात्यजेतिभावः कीदृशोहं कीदृशींत्वांअनाथःदीनःस्वाम्यंतराभा

अनाथः स्नेहार्द्रांविगलितगतिः पुण्यगतिदांपतन्विश्वोद्धर्त्रींगदविगलितःसिद्धभिषजं

वचानित्यर्थः स्नेहार्द्रांस्नेहेनप्रीत्याआर्द्रांक्लिन्नां आर्द्रंसार्द्रंक्लिन्नमित्यमर पुनःकीदृशोहं कीदृशींत्वांविग
लितगतिः विगलितानष्टागतिः गमनंयस्यसः यद्वा विगलितापापबाहुल्येननष्टागतिः पुण्यलोकेगतिः ग
मनंयस्यसः पुण्यगतिदांपुण्येषुगतिः तांददातिसातां यद्वापुण्येषुपुण्यलोकेषुगतिदां पुं॰ पतन्पतितःवि
श्वोद्धर्त्रींउद्धारकर्त्रींत्रिभुवनविधातुश्चकलहइतिवत् शेषषष्ठ्यासमासः एवंचविश्वांतर्गतस्यममोद्धारंकरि

रिप्यस्येवेतिभावः पु० मदविगलितः गदैः आतंकैः रोगैरित्यर्थः विगलितः विशेषेणगलितः जर्जरितः यक्ष्मांत
कगदाबाधाः शब्दाः पर्यायवाचकाइति सिद्धभिषजंसिद्धौषधदांसिद्धवैद्यरूपामित्यर्थः रोगहार्यगदंकारोभिष
क् वैद्योचिकित्सकइत्यमरः पु० तृष्णाकुलितहृदयः तृष्णयापिपासया आकुलितंव्याप्तंहृदयं यस्यसः स्
धासिंधुंस्धायाअमृतस्यसिंधुंसमुद्रं यद्वास्धायाः सिंधुंदेशंयद्वास्धायाः सिंधुंनदीं तथाचामरः देशेनद
विशेषेब्धौसिंधुर्नासरितिस्त्रियामिति अत्रपरिकरालंकारः साभिप्रायविशेषणानांसत्वात् तदुक्तंकुवलया

सुधासिंधुंतृष्णाकुलितहृदयोमातरमयंशिशुः संप्राप्तस्त्वामहमिहविदध्याःसमुचितम् २४
विलीनोवैवस्वतनगरकोलाहलभरोगतादूतादूरंक्वचिदपिपरेतान्मृगयितुम् तदे अलंकारःपरिकरः

साभिप्रायेविशेषणइति २४ इदानींयदारभ्यतवकथाभूलोकमागतातदारभ्ययमनगरकोलाहलःशांतः तद्दूताअ
पिदूरदेशंगताः विमानसंघश्चदेववीथींविदलयतीत्याह विलीनइति भोजननियदवधियदारभ्यतेतवकल्याणीक
ल्याणकारिकाकथामहीमंडलमगात् इणोगालुङीतिगादेशेगातिस्थेतिसिचोलुक् तदारभ्यवैवस्वतनगरकोला

हलभरः वैवस्वतस्यांतकस्य वैवस्वतोंतकइत्यमरः नगरंपुरंतत्र कोलाहलभरः कलकलसमूहः कोलाहलःकलक
लइत्यमरः विलीनः विशेषेणलीनः गुप्तअभूदितिशेषः विशेषश्चकस्मिन्नपि कालेईषदपिनास्तीति पूर्वंतत्रपापि
गमनेनतेषांताडनात् कोलाहलःस्थितिः इदानींतुत्वत्कथाश्रवणमाहात्म्येनपापाभावात् कस्यापितत्रगमना
भावेनताडनाद्यभावादितिभावः दूताअपिअर्थात् यमसंदेशहारकाअपि स्यात्संदेशहरोदूतइत्यमरः क्वचिद्दे
शेपरेतान् शवान्मृगयितुं अन्वेषितुंदूरंगताः यस्मिन्देशेत्वत्कथाश्रवणंनास्तितत्रगताइत्यर्थः ननुयमनगर

विमानानांव्रातोविदलयतिवीथीर्दिविषदांकथातेकल्याणीयदवधिमहीमंडलमगात् २५

गमनाभावेत्वत्कथाश्रवणिनः केगच्छंतीतिचेत्तत्राह विमानानांविशिष्टं आनयंति येते विगतंमानंवायेषांतेवि
मानाः व्योमयानानि व्योमयानंविमानोस्त्रीत्यमरः तेषांव्रातोनिकरः स्तोमौघनिकरव्राताइत्यमरः दिविषदांदिविसी
दंतितेदिविषदोदेवाः तेषांशद्लृविशरणगत्यवसादनेष्विति धातोःसत्सूद्विषेतिक्विप् ह्रद्युभ्यांचेतिङेरलुक् सु
षामादित्वात्षत्वं वीथीःमार्गान् देवगमनमार्गानित्यर्थः विदलयति विशेषेणदलयति विदारयति त्वत्कथाश्र

वणमाहात्म्येनसर्वेषांविमानैर्गमनात् वारंवारंविमानसंबंधात् खवनितानिव करोतीत्यर्थः २५ इदानींतवजल
कणाः कामक्रोधज नितज्वरदग्धशरीरिणामस्माकंसंतापशमनंकुर्वंत्विति प्रार्थयते स्फुरदिति दिव्यसरितः दि
विआकाशे भवादिव्या भवार्थेदिगादिभ्योयत् स चासौसरिच्चतस्याःगंगायाःमरुदुल्लासलहरिछटाचंचत्पाथः
कणसरणयः मरुतः वायोरुल्लासः संबंधः गमनंवा लसंश्लेषणगमनयोरितिधातोर्भावेघञ् तेनयाल्लहर्यः

स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांनः प्रतिदिनं हरंतांसंता
पंकमपिमरुदुल्लासलहरीछटाश्चंचत्पाथःकणसरणयोदिव्यसरितः २६

तासांयाश्छटाः परंपराः ता
भिश्चंच त् उद्धत् यत्पाथः उदकं कबंधमुदकं पाथः इत्यमरः तस्यकणाः तुषाराः तेषांसरणयः पंक्तयः नः
अस्माकंकमपि औषधादिभिरसाध्यतया अपहर्तुमशक्यमपिसंतापंहरंतांनाशयंतु कथंभूतानांनः प्रतिदिनंदि
नेदिने इतिप्रतिदिनमव्ययंविभक्तीतिसूत्रेयोग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानीतित्वत्वारोयथाशब्दार्थाः त
त्रवीप्सायां अव्ययीभावः स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषां कामोभिलाषः कामःपंच

शारः स्मृतइत्यमरः क्रोध अमर्षः कोपक्रोधामर्षरोषइत्यमरः स्फुरंतौदेदीप्यमानौचतौकामक्रोधौचताभ्यांप्रचलत
रमतिशयितंसंजातःउत्पन्नः अतएवजटिलःशिखावान् एतादृशोयोज्वरः तस्यज्वालाः अर्चयः तासांजालंसमूहः
तेनज्वलितंदग्धंतादृशंवपुःशरीरंयेषांतेषाम् २६ पूर्वंजलकणाः संतापंहरंतामित्युक्तम् इदानींतापबाहुल्यात्कणा
नांकथंतत्संभवतीतिचेत् नवजलानांसंघातः अस्माकंतापशमनंकरोत्विति प्रार्थयते इदमिति भोजननि श्री

इदंहिब्रह्मांडंसकलभुवनाभोगभवनंतरंगैर्यस्यांतर्लुठतिपरितस्तिंदुकमिव सएषश्रीकंठप्रवितत
जटाजूटजटिलोजलानांसंघातस्तवजननितापंहरतुनः २७

कंठप्रविततजटाजूटजटिलःप्रविततःविस्तृतः
सचासौजटाजूटश्च श्रीकंठस्य प्रविततजटाजूटः तेनजटिलःसजटः एतादृशः सएषः तवजलानांसंघातः समुदायः
नःअस्माकंतापंहरतु सकः यस्यजलानांसंघातस्यांतर्मध्ये सकलभुवनाभोगभवनम् सकलभुवनानांचतुर्दशभुव
नानां आसमंतात् भोगःसुखं भोगःसुखेस्त्र्यादिभृतावित्यमरः यद्वा सकलभुवनानांआभोगः परिपूर्णता आ
भोगः परिपूर्णतेत्यमरः तस्यभवनंगृहम् एतादृशमिदंब्रह्मांडंतरंगैःसह सहयुक्तेप्रधानेइतिसूत्रेणतृतीया प

रिनस्तिंदुकमिव तिंदुकस्यफलंतिंदुकम् तिंदुकः स्फूर्जकमित्यमरः तेंबुणीतिभाषायांप्रसिद्धिः लुठति लुठसंश्ले
षणे तुदादिः हीति आश्चर्ये यस्मिंश्चतुर्दशभुवनाधारब्रह्मांडमपिस्थितं सोपिशिवकपर्देस्थितइत्याश्चर्यम् अ
त्रोत्तरोत्तरमुत्कर्षस्यसत्वात् सारालंकारः तदुक्तं अप्पय्यदीक्षितैः कुवलयानंदे उत्तरोत्तरमुत्कर्षः सारइत्य
भिधीयतइति २७ इदानींननुरे तीर्थांतराणिशिवादिदेवांश्चविहाय मामेवकिंस्तौषीतिचेत्तीर्थानिमदुद्धरण
विधौ लज्जंते शिवादयश्चकर्णेहस्तंस्थापयंति त्वंतुमातृत्वेन दययामांपुनानातेषांपापनाशनाभिमानंनाश

त्रपंतेतीर्थानित्वरितमिह यस्योद्धृतिविधौकरंकर्णेकुर्वंत्यपिकिलकपालिप्रभृतयः ॥

यसीत्याह त्रपंतइति भोअनुकंपार्द्रहृदये अंब अनुकंपादयातया आर्द्रंहृदयंयस्याः सातत्संबोधनम् एतादृ
शि अंबजननि अंबत्वेनत्यागानर्हेतातं इमंतवसमीपे वर्त्तमानंमांजगन्नाथंपुनाना पुनाति तच्छीला ताच्छील्येशा
नच् पवित्रीकुर्वाणाइयंत्वंतेषांतीर्थादीनां अघमथनदर्पं अघस्यपापस्यमथनंनाशनंतस्यदर्पः गर्वः तंदलयसि
विदारयसिनाशयसीत्यर्थः एतावत्कालपर्यंतंतेषांपरमगर्वः स्थितः त्वयंसर्वेषांपापनाशनं [illegible]ः इदानींतु ममप

रमपातकिनः तद्धस्तेन उद्धारणाभावात् त्वयाउद्धारणस्यकृतत्वात् तेषांगंगांगत इतिभावः ननुतेषांहस्तेन कि मित्युद्धरणंनभवतीतिचेत्तत्राह तंकम् इहयस्य उद्धृतिविधौउद्धृतेःविधिः करणं तत्र विधिर्विधानेदैवेचेत्यमरः ती र्थानिगोदावर्यादीनि त्सरितं यथास्यात्तथामहापातकिनो ममदर्शनसमयएवेतिभावः त्रपंते लज्जितानिभवंति स्वह स्तेन महापातकिनोममोद्धारणाभावाल्लज्जेतिभावः पुनस्तंकम् यस्योद्धारणविधौकपालिमभृतयोपि कपालीप्रभृतिः

इमंतंमामंबत्वमियमनुकंपार्द्रहृदये
पुनानासर्वेषामघमथनदर्पंदलयसि २८

आदिर्येषांते विष्ण्वादयोपिकर्णेहस्तंकुर्वंतिस्थापयंतीत्यर्थः स्वहस्तेनएतस्योद्धृत्यभावात् एतस्यकिमपिनश्रोत व्यमित्याशयेन कर्णेहस्तन्यासइतिभावः कर्णंकर्णेइत्येकवचनंतुद्वितीयकर्णेनश्रोतव्यम् यदिस्वहस्तेन एतदी यंकार्यंभविष्यतिचेत्करिष्यामः नोचेन्नेत्येतदर्थबोधनाय २८

इदानीं अपरिमित संशयेन पापाचरणेनिवृत्तेश्चांडालानांसमूहैरपित्यक्तानांपापानामाकरैः पुनातुंयत्नंकुर्वं त्यास्तवस्तुनिंकर्तुं नरपशुरहं कथंशक्नुयामित्यहंकारपरिहरणव्याजेनाह श्वपाकानामिति भोजननि मामुद्र त्रुंपरिकरं कटिबंधंविवेकमारंभं यत्नंवा प्रगाढगात्रेक बंधेविवेकारंभयोरितिविश्वः यत्नारंभौपरिकराविति त्रिकांडशेषः घटयंत्याः कुर्वत्यास्तवश्लाघांस्तुतिं कर्तुंनरपशुरिवेति व्याघ्रादित्वात्समासः सर्वा नविशे षेणपश्यतीतिपशुः हिताहितज्ञानशून्यः मूर्खइतियावत् एतादृशोहंकथमिवकेनापिप्रकारेणसमर्थः

श्वपाकानांव्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकंकिलसदनमेनःपरिषदां ॥

अपितु नकथमपीत्यर्थः मन्मतिमांद्यात्तवगुणानामपारत्वाच्चेतिभावः अहोइत्याश्चर्ये परमपातकिनंमां पुनातुंयत्नादिकंकरोषीत्याश्चर्यम् कथंभूतंमाम् अमितविचिकित्साविचलितैः अमिता अपरिमिता बह्वी त्यर्थः साचासौविचिकित्साचइतः परंपातकानिकर्तव्यानिवानवेत्याकारःसंशयः विचिकित्सातुसंशय इत्यमरः यद्वा विचिकित्साजुगुप्साख्योबीभत्सरसस्थायीभावः कितसंशयइति धातोर्गुप्तिज् किन्द्य

415

इति सनिसन्यङोरितिद्वित्वेगुरोश्चहलइत्यप्रत्ययेटाप् अमितायाविचिकित्सायाश्चलितैः पातकान्निदर्नैःएता
दृशैः श्वपाकानांश्वानंपचंतितेश्वपाकाः चांडालाः यद्यपिपचादिगुणेश्वपचेतिअजंतेनिपातितम् तथापि
न्यक्वादिगणेश्वपाकशब्दस्यपाठात् पक्षेकर्मण्यणिकुत्वम् निषादश्वपचावंते वासिचांडालपुल्कसाइत्यम
रः तेषांव्रातेः समूहैः नवैकेनद्वाभ्यां वाविमुक्तानांविशेषेणमुक्तानांविशेषश्चमनः पूर्वकत्यक्तानांनतुलोकल

अहोमामुद्धर्तुंजननिघटयंत्याः परिकरं नवश्लाघांकर्तुंकथमिवसमर्थोनरपशुः २९ नकोप्येता
वंतरवलुसमयमारभ्यमिलितोयदुद्धारादाराद्भवतिजगतोविस्मयभरः॥

ज्जयेति एतादृशीनामेनःप
रिषदांएनसांपापानांपरिषदः सभाः समूहाइत्यर्थः तासामेकं अद्वितीयंसदनंगृहंकिलनिश्चयेनप्रसिद्धोवा
आश्चर्येवा एतादृशमपिपापिनंमांपुनातुउक्तासीत्याश्चर्यम् २९ इदानींकस्यचिन्महापातकिनः समुद्धरणेनज
गतः आश्चर्यसंपादनीयमितितवमहतीच्छास्थितासाएतावत्कालपर्यंतंतादृशस्यकस्यचित्पातकिनः अभावा
न्नैवपूर्णा अहंतुतादृशेच्छांसफलीकर्तुंप्राप्तोस्मि अतःममोद्धरणेनस्वेच्छासाफल्यंकुर्विति प्रार्थयते नेतिभो

टीका.

416

अंब एतावंतं समयमारभ्य एतावत्कालपर्यंतं कोपि कश्चन पातकी नामिलितः नप्राप्तः मयेतिशेषः आरात् यद्दु
द्धारात् यस्योद्धारस्तस्मात् जगतः विस्मयपरः भवतीति ते मनसि चिरकालं बहुकालं स्थितवतीं तिष्ठतीति
स्थितवती तामिमां पूर्वोक्तामीहामिच्छां सफलयितुं असफला सफला भवति तथा कर्तुम् भृशादित्वात्
क्यङ्न्नानिनोश्चेतिपुंस्त्वम् तुमुन् अयमहं जगन्नाथः संप्राप्तः अस्मीतिशेषः नः अस्मान्प्रणयपापौघनिर

इतीमामीहांते मनसि चिरकालं स्थितवतीमयं संप्राप्तोहं सफलयितुं मंब प्रणायनः ३० श्वदृत्ति
व्यासंगोनियतमथमिथ्याप्रलपनं कुतर्केष्वभ्यासः सततपरपैशून्यमननम् ॥ स्योतमांगतिं नयेत्यर्थः

उपसर्गादसमासेपीतिणत्वम् अंबेत्यनेन तवजननित्वं चेदहं तवपुत्रः एवं च मातुरिच्छा सत्पुत्रेण मयासफली
कर्तव्येति सत्पुत्रधर्म एवायमिति सूचितम् ३० इदानीं ममानेकदुष्टगुणान् श्रुत्वा त्वां विना अन्यः कश्चन ममसु
खनिरीक्षणमपि न कुर्यादित्याह श्वदृत्तीति भोमातः श्वदृत्तिव्यासंगः शुनः वृत्तिः इतस्ततो भ्रमणं उच्छि
ष्टभक्षणाचरणादि तद्व्यासंगः उद्योगः मया कृत इतिशेषः अथानंतरं नियतं नियमेन मिथ्याप्रलपनं अस

स्यानर्थकमपिभाषणंकृतं मलापोनर्थकंवचइत्यमरः परमपुण्यशीलेनयुधिष्ठिरेणासकृन्मिथ्योक्तमितितज्ज न्यपापवशादंतरिक्षगस्तद्रथः भूमौलग्नइतिस्पष्टं महाभारते मयातुसत्यत्यागपूर्वकंसर्वदैवतत्कृतमितिमत्पाप संख्यैवनेति आकृतम् कुतर्कैःकुत्सितानांपरस्त्रीगमनपरगृहहारादिरूपकर्मणांतर्काः ऊहाः तेषुयद्वाकुत्सि ताश्चतेतर्काश्चतेषुयद्वा साक्षाद्ब्रह्मविद्यायाअप्रतिपादकत्वे नपरजयेच्छयाचकुत्सितास्तर्काः तर्कशास्त्र ग्रंथाः तेषुअभ्यासोपिकृतः सततपरपैशून्यमननमपिकृतंपिशुनस्यसूचकस्यभावः पैशून्यं हेजिह्वेपरेषांपै

अपिश्वावंश्रावंममतुपुनरेवंगुणगणानृतेत्वत्कोनामक्षणमपिनिरीक्षेतवदनम् ३१

शून्यंतस्यमननंचिंतनम् अभ्यासमितियावत् सततंनिरंतरंचतत् पैशून्यमननंचतदपिकृतं एवंप्रकारेणमम तुपुनर्गुणगणान् श्रावंश्रावंकृत्वाकृत्वा त्वहृतेत्वांविना अन्यारादितिसूत्रेणकृतेयोगे त्वदितिपंचमी कोना मक्षणमपिवदनं अर्थात् ममसुखंनिरीक्षेतपश्येत् अपितुनकोपीत्यर्थः तवतुमातृत्वेनदयाबाहुल्यादीदृश स्यममसुखनिरीक्षणमावश्यकमेवेतिभावः तदुक्तंश्रीमच्छंकराचार्यैः कुपुत्रोजायेतक्वचिदपिकुमातानभवती ति ३१

इदानीं यस्य मनुष्यस्य नेत्राभ्यां परमरमणीयं तवशरीरं न दृष्टं यस्य कर्णाभ्यां तवलहरीकोलाहलध्वनश्रुतः तस्य ने
त्रे व्यर्थे कर्णौ च व्यर्थौ वित्याह विशालाभ्यामिति अन्वयस्य तस्येत्यध्याहारः भोजननि यस्य मनुजस्य मानवस्य मनु
जामानवानराइत्यमरः याभ्यां नेत्राभ्यां परमरमणीया अतिसुंदरी अनेन दर्शने कारणं सूचितं एतादृशी तवतनुः
शरीरं न आलीढा न सादरमवलोकिता तस्य मनुजस्य विशालाभ्यां आकर्णविस्तृताभ्यां आभ्यां नयनाभ्यां कृत्वा

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया तव तनुः अ
यं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ३२

इह भूलोके किं
फलं न किमपीत्यर्थः यद्वा इह नालीढेति योजना यस्य ययोः श्रवणयोः कर्णयोरंतर्मध्ये तव लहरिलीलाकल
कलः लहरीणां लीलाक्रीडा तया कलकलः कोलाहलः कोलाहलः कलकल इत्यमरः इह नयातः न प्राप्तः तस्य न
योः श्रवणयोः अयं श्रवणरूपः न्यक्कारः धिक्कारः अस्ति निशेषः खलु निश्चयेन यद्वा ययोः श्रवणयोः अंतर्मध्ये
तव लहरिलीलाकलकलः नयातः ताभ्यां श्रवणाभ्यां कृत्वा किं फलम् न किमपीत्यर्थः परंतु अयं अदर्शनाश्र

यथारूपस्य कारोमनुजस्यनत्विंद्रियाणाम् इंद्रियव्यापारस्य मनुष्यव्यापाराधीनत्वादितिभावः तदुक्तम् कर
णंहिकर्तृकमिति एतत्पक्षेयस्यतस्येतिनाध्याहारः नाम्नामित्यस्यचाध्याहारः अहंतुसर्वदेवत्वत्तनुं
पश्यामि लहरीशब्दंचशृणोमि अतोममनेत्रकर्णनव्यर्थमित्याकूतम् एवंचशीघ्रंमांपुनीहीति भावः अत्र
विनोक्तिध्वनिरलंकारः त्वद्दर्शनंविनानयनयोः त्वल्लहरिकोलाहलश्रवणंविनाश्रवणयोश्चरमणीयत्वस्यफ
लमप्यधिकाराभ्यांव्यंजनात् ३२ इदानींपुण्यवंतोविमानैः सुरपुरंस्वच्छंदंयांतिपापिनरकपराधीनाःसंतो

विमानैःस्वच्छंदंसुरपुरमयंतेसुकृतिनःपतंतिद्राक्पापाजननिनरकांतःपरवशाः॥

नरकमध्येपतंतीतिकोटिद्वयंयत्रदेशेत्वंनासितत्रसंभवति यत्रतुनिखिलपापनाशिनीत्वमसितत्रद्वितीय
कोटेरभावात् आद्यकोटिरेवसंभवतीत्याह विमानैरिति भोजननिसुकृतिनःपुण्यवंतः विमानैः सुरपुरंसुरा
णांदेवानांपूर्नगरीताम् यद्वा सुराणांपुरंनगरंस्वर्गं स्वच्छंदं यथास्यात्तथानतुतद्गुणादिवशेन अयंतेगच्छंति
पापाःपापरूपाःजीवाःपापबाहुल्येनपापपुरुषयोस्त्रिमुनिव्याकरणमितिवदभेदः यद्वापापमस्तियेषांतेपापाः

इतिमत्वर्थे अर्शआद्यच् अतएवपापोहं पापकर्माहमित्यादिप्रयोगाः संगच्छंतइतिदिक् पापमर्हंतीतिवा परवशाः संतः यमनगरगणाधीनाः संतइत्यर्थः नरकांतः नरकस्यांतर्मध्येद्राक् शीघ्रंयमनगरगमनसमयएवेत्यर्थः पतंति भोमातः अयंविभागः विषयव्यवस्यातस्मिन्नशर्मभमयमूर्तौ अशर्मभमयी अकल्याणप्रचुरामूर्तिः ननुर्यस्यतस्मिन् स्त्रियाःपुंवदितिपुंवद्भावः देशस्याशर्मभमयत्वंतत्रतवस्थितेरभावादेव एतादृशेजनपदेदेशेनीवृज्जनपदोदेशइत्यमरः अस्त्विति शेषः तस्मिन्नशर्मभमयमूर्तौ जनपदे अयंविभागइति योजना तस्मिन्क

विभागोयंतस्मिन्नशर्मभमयमूर्तौजनपदेनयत्रत्वंलीलादलितमनुजाशेषकलुषा ३३

स्मिन् यत्रजनपदे दलितमनुजाशेषकलुषा मनुजानांमनुष्याणां अशेषकलुषंसमस्तपापं दलितंनाशितं मनुजाशेषकलुषं ययासा एतादृशीत्वंनासि यत्रत्वंदलितमनुजाशेषकलुषासतीनासीतिवायोजना एवंचार्थादेतादृशीत्वंयत्रासि तत्रकस्यापियातकिनअभावात्सर्वेपिविमानैः सुरपुरंगच्छंतीति आद्यकोटिरेवास्थितेतिभावः अत्रपरिकरालंकारः दलितमनुजाशेषकलुषेतिसाभिप्रायविशेषणस्यसत्वात् तल्लक्षणंतुपूर्वमुक्तम् ३३

इदानींसमस्तमहापातकिनोपिमरणसमये त्वयिशरीरं त्यक्तवंतः संतः उत्तमलोकं गच्छंतीत्याह अपीति अ
मयेते इत्यध्याहारः पूर्वश्लोकात्पापाइत्यनुवर्तते तथाचैवं योजना भोअंब तेपापाःपापिनः पुरुषाः अंतेमरणस
मये त्वयि तनुंशरीरं विहायसंत्यज्य अतनुदानाध्वरजुषाम् नतनु अल्पमित्यतनु महत् तच्चतद्दानंच तेनयेध्वराः
सर्वस्वदक्षिणायज्ञाः यज्ञः सवोऽध्वरोयागइत्यमरः यद्वा अतनूनिमहांतिदानानियेषुतेचते अध्वराश्च यद्वा
अतनुदानानिचाध्वराश्च यद्वा नतनुः कोपः तेनयानिदानानि अध्वराश्च तनुः कोपेत्वचिस्त्रीस्यात्रिष्वल्पेविरले

अपिघ्नंतोविप्रानविरतमुशंतोगुरुसतीः पिबंतोमैरेयंपुनरपिहरंतश्चकनकम् ॥

कृशइतिमेदिनी तावज्जुषंतिसेवंतेकुर्वंतीत्यर्थः तेअतनुदानाध्वरजुषः तेषांउपरिउपरिलोके क्रीडंतिविहरं
ति महादानयागप्राप्यलोकोपरितनलोकं गच्छंतीत्यर्थः तथाच गंगातनुत्यागादेवोत्तमलोकप्राप्तेःपरमो
त्कृष्टसाध्यमहादानयागेषुनकिंचिदधिकंफलमितिभावः तेकेयेपापाः विप्रानपिब्राह्मणानपि अविरतंनि
रंतरं यथास्यात्तथा इदंसर्वक्रियान्वयि घ्नंतितेघ्नंतः हनधातोः शतरिगमहनेत्युपधालोपः नलोपेतिषष्ठीनि



422

षेधाद्द्विमानित्यादिद्वितीया पुनः तेके ये गुरुसतीः गृणातिबोधकंकरोतिगुरुः कृग्रोरुच्चेत्युणादिसूत्रे
णगृशब्दे इत्यस्मात् कुप्रत्ययःउकारश्चांतादेशः तथाचोपनयनादर्वाचीनसंस्कारपूर्वकंवेदाध्यापकोमंत्रो
पदेशश्चगुरुः स्यान्निषेकादिकृद्गुरुरित्यमरः तस्यसत्यःपतिव्रताःस्त्रियः सतीसाध्वीपतिव्रतेत्यमरः ताःउ
शंतः वशांति इच्छंतितेउशंतः वशकांतौअदादिः तत्रहिकांतिरिच्छेत्युक्तम् तस्माच्छतरिग्रहिज्येतिसंप्र
सारणम् यद्वा गुरोःपितुःसतीःमातृरित्यर्थः यद्वागुरोःश्रेष्ठपितृव्यभ्रातृमातृमातुलादेःसतीःयद्वागुरोःबृह

विहायत्वय्यंतेतनुमतनुदानाध्वरजुषासुपर्यंबक्रीडंत्यखिल सुरसंभावितपदाः३४

स्पतेःसतीः तस्यएकस्त्रीत्वेपिजात्यभिप्रायेणबहुवचनमिति यथाकथंचिद्योज्यम् तथाचानेकार्थकोशः गुरुः
पितागुरुःश्रेष्ठोगुरुः सुरपुरोहितः दुर्वहोपिगुरुःप्रोक्तोगुरुःशिष्याभिसेचकइति पु० येमैरेयंसीधुम् मैरेयमास
वःसीधुरित्यमरःपिबंतःपानंकुर्वंतः पु० तेकेयेकनकंसुवर्णंसुवर्णंकनकमित्यमरःहरंतःचोरयंतः कथंभूताःतेअ
खिलसुरसंभावितपदाःअखिलसुरैःसमस्तदेवैःसंभावितंसंभावनायुक्तंकृतंपूजितमितियावत्तादृशंपदंचरणं

येषां ते बहुवचनांतेन समासः यद्वा अखिलस्फराणां संभावितं ग्रासं तादृशं पदं स्थानं येस्ते समीविशेषेणइति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिर्वा कर्तव्यः संपूर्वक भू धातोर्णिजंतात्क्तः उपसर्गबलादुक्तार्थलाभः ३४ इदानीं महान् चोरः पुनरपि नराणां प्राणहारकोपि वायुः त्वत्कृहरिसंबंधमाहात्म्येन त्रिभुवनं पवित्रीकरोतीत्याह अलभ्यमिति भो अंब सोपि परचौर्यपरम्पायाहारित्वादिगुणयुक्तोपि पवमानः प्रभंजनः पवमानःप्रभंजन इत्यमरः त्वदीयानां तवइमाः त्वदीयाः युष्मदस्मदोरन्यतरस्यां खञ्चेति चाच्छः प्रत्ययोत्तरपदयोश्चेति त्वादेशः तासां लीला

अलभ्यं सौरभ्यं हरति सततं यः सुमनसां क्षणादेव प्राणानपि विरहशस्त्रक्षतभृतां

चलितलहरीणां लीलया चलिताः चंचलाः गच्छंतो वा चलगतावित्यस्मात् गत्यर्थाकर्मकेत्यनेन कर्तरिक्तः एतादृश्यो याः लहर्यः तासां व्यतिकरात् संबंधात् त्रिभुवनजगत्त्रयं पुनीते पवित्रीकरोति अहहेत्यद्भुते अहहेत्यद्भुतेखेदइत्यमरः ननु देवोपि वायुः कथं चौर्यादिगुणयुक्त इत्याकांक्षायामाह सकः यः पवमानः सुमनसां पुष्पाणां स्त्रियः सुमनसः पुष्पमित्यमरः अलभ्यमन्यत्र चौरैरप्राप्यम् अनेन चौर्ये वायोः कौशल्यमावेदितम् एतादृशं

सौरभ्यंसौगंध्यंनियतंयथातथा हरति चोरयति पुनः सकः यः विरहशरक्षतभृतांविरहएववरूयादिवियोगएवश
स्त्रंमारकत्वात् यद्वा विरहश्चशस्त्रंचविरहशस्त्रे ताभ्यांयत्क्षतंतत् बिभ्रतितेविरहशस्त्रक्षतभृतः तेषां
कचित्तुविरहशस्त्रक्षतहृदामितिपाठः तत्रविरहशस्त्राभ्यांक्षतंक्षतयुक्तंकृतम् विदारितमितियावत् ताह
शंहृत् येषामितिसमासः यद्वा विरहशस्त्रयोः क्षतंयस्मिन्नितिव्यधिकरणपदोबहुव्रीहिः तादृशंहृत् येषाम्
विरहशस्त्रक्षतयुक्तंहृत्येषामितिशाकपार्थिवादित्वान्मध्यमपदलोपिसमासोवा तेषांप्राणानपि अस्तु

त्वदीयानांलीलाचलितलहरीणांव्यतिकरात्पुनीतेसोपिद्रागहहपवमानस्त्रिभुवनं२५

नपि पुंसिभूम्न्यसवः प्राणाइत्यमरः क्षणादेवक्षणमात्रेणैवनियतंयथास्यात्तथाहरति एतादृशः दुष्टोवायुः श्रे
ष्ठः त्वल्लहरिसंबंधमहात्म्येनमहत्कार्यंकरोतीतिभावः उक्तंचहनूमन्नाटके येमज्जंतिनिमज्जयंतिचपरांस्तेप्र
स्तरादुस्तरेवार्द्धौवीरतरंतिवानरभटान्संतारयंतेपिच नैतेग्रावगुणानवारिधिगुणानोवानराणांगुणाःश्रीम
द्दाशरथेःप्रतापमहिमासोयंसमुज्जृंभतइति लोकेपिदुष्टःप्रभुर्भृत्यत्वसंबंधमाहात्म्येनमहत्कार्यंकरोतीतिप्रसि

ष्टमेव ३५ इदानींकेचनलोकाः परकार्यसंपादकाः संतिकेचनपवित्रात्मानः संतः परलोकप्रयायिनोभवंति अ
हंतुत्वयिस्थापितलोकहृद्भरः सन्स्फुरवेननिद्रांकरोमीत्याह कियंतइति भोमानः कियंतः कतिसंख्याकाः
एकेसाधारणालोकाः इहजगतिनियतंलोकार्थघटकाः लोकानांजनानांअर्थाः प्रयोजनानि अर्थैरैविभवा
अपीत्यमरः तेषांघटकाःसंयोजकाःसंति यद्वा इहकियंतःएके लोकार्थघटकाःसंतः परलोकप्रयायिनःपर
लोकंप्रयायंति प्रार्थयंतिते यद्वा परलोकंप्रकर्षेणनयंतिगच्छंति तेपर लोकप्रयायिनः संतीतियोजना इहलो

कियंतःसंत्येकेनियतमिहलोकार्थघटकाः परेपूतात्मानः कतिचपरलोकप्रयायिनः

केपरकार्यसंपादनजन्यपुण्येनस्वर्गलोकंगच्छंति एवंचतेषामयंलोकः परलोकश्चसमीचीनइत्याकूतम् परेचा
न्येचकति यद्वा कतिपरेच पूतात्मानः संतः पूतः तपःसेवनादिनापवित्रः आत्मायेषांतेएतादृशाःसंतः नियतं
परलोकप्रयायिनः संति भोमानः अयंजगन्नाथस्तुपुनः शब्दस्पर्शः तवरूपातः पंचम्यंतात्तासिल्प्रत्ययाहेतोः
शश्वन्निरंतरंस्फुरवंयथास्यात्तथाशेतेनिद्रांकरोति शश्वदित्यनेनकदापिअन्यन्नकरोति स्फुरवमित्यनेन त



426

नैवममस्करवंनान्यत्रेतिसूचितम् ननुएवंच लोकद्वयेतवकागतिरितिचेत्तत्राह कथंभूतोयं त्वयिनिहितलोकद्वयभरः त्वयिभवत्यांलोकद्वयेइहलोके परलोकेचभरः सर्वेभ्योउत्कृष्टतानिहितः स्थापितः लोकद्वयभरोयेनसः भरःउद रपोषणंवाडुभृञ्धारणपोषणयोरित्यस्माद्चीतिदिक् ३६ इदानींननुरेपापनिवृत्तयेमांस्त्नौषितत्रादोपायमेव किमर्थंकरोषीतिचेत्त्वयास्वपतिताश्लीलशवशकलसमुदायपरित्राणं यथाक्रियते तथामयापिपापंक्रियतेस्व स्वभावस्यसर्वैरपिदुष्परिहारित्वादित्याह भवत्याहीति भोअंब व्रात्याधमपतितयाव्रात्याश्चअधमाश्चव्रात्याध

सुरवंशेतेमानस्तवरवलुकृपातःपुनरयंजगन्नाथःशश्वत्त्वयिनिहितलोकद्वयभरः ३६ भवत्या हिव्रात्याधमपतितयारवंडपरिषत्परित्राणःस्नेहःश्लथयितुमशक्यःरवलुयथा॥ मा: व्रात्या:संस्का

रहीना:अधमानीचाःतेपतिताःयस्यांसातया आहिताग्न्यादित्वात्पतितशब्दस्यपरनिपातः यद्यपिपतेःसन्नितनिपति इत्यस्यवेट्कत्वात् निष्ठायांयस्यविभाषेतिइण्निषेधः प्राप्नोति तथा द्वितीयाश्रितातीतपतितेतिनिपातनाद्भवति एतादृश्याभवत्यात्वयारवंडपरिषत् परित्राणस्नेहःरवंडानामर्थात् स्वपतितशवशकलानांभिन्नशकलरवंडेवाङुस्य

द्वेर्द्दिसमेंशक इत्यमरः परिषत्‌समुदायः तस्याः परित्राणंपालनं तत्रस्नेहः प्रेम प्रेमानाप्रियताहार्दंप्रेमस्नेहइत्यमरः श्लथयितुंत्यक्तुं यथाशक्यः खलुनिश्चयेन एवंदुरितनिवहे दुरितस्यपापस्यनिवहः समूहः तत्रममापिप्रेमाप्रियता अ-स्तीतिशेषः यतोयस्मात्‌कारणात्‌जगतिसर्वैरपि अयंस्वभावोनिसर्गः स्वरूपंचस्वभावश्चनिसर्गश्चेत्यमरः दुष्परिहरः दुःखेनापिपरिहर्तुमशक्यः अस्तीतिशेषः दुःखशब्देउपपदेहरतेः ईषद्दुःखितसूत्रेणखलु यद्वा दुरितनिवहेजगतीतियोजना आत्माधमपतितयेत्यनेन तेषामपिरक्षणेकिंवक्तव्यंपुण्यवतामित्यावेदितम्‌ खंडमित्यनेनअवयव

ममाप्येवंप्रेमादुरितनिवहेधंवजगतिस्वभावोयंसर्वैरपिखलुयतोदुष्परिहरः ३७

स्यपालनेकिंवक्तव्यम्‌ अवयविनः इत्याशयः परिषदित्यनेनैकमपिनत्यजतइतिभावः दुरितनिवहेत्यनेनबहुषुपातकेषुमध्येच्छानत्वेकस्मिन्‌द्वयोर्वेत्यावेदितम्‌ अत्रनिंदयास्तुत्यभिव्यक्तेर्व्याजस्तुत्यलंकारः तदुक्तंकुवलयानंदे उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यांस्तुतिनिंदयोरिति ममयथाविवेकलेशोपिनतेरामचंद्ररणेरिपून्‌हतान्‌खनाशकान्‌शीघ्रंपापिनोनयसेदिवमिति अत्रारीन्‌दिवंनयसेइत्युक्त्याभक्तानवश्यंनयसेइतिस्तुत्याभिव्यक्तिः ३७





128

इदानीगंगातांडवविधिंवर्णयन्स्वतापशमनंप्रार्थयते प्रदोषेति त्रिदशतटिनीतांडवविधिःत्रिदशानांदेवानांतटिनी
गंगा तस्याःतांडवम् तंडुना तच्छास्त्रप्रवर्तकाचार्येणप्रोक्तंतांडवंनाट्यं तेनप्रोक्तमित्यणिओर्गुणइतिगुणः तांडवं
नटनंनाट्यमित्यमरः तस्यविधिः करणंविधिर्विधानेदैवेचेत्यमरः तापंअर्थाद्भक्तजनसंतापं यद्वापूर्वश्लोकान्ममे
त्यनुवर्तते तथाच ममतापंतिरोधत्तांअंतर्धानंगमयतु नाशयत्वित्यर्थः तांडवसामग्रीमाह कथंभूतस्त्रिदशत
टिनीतांडवविधिः प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः प्रदोषस्यसूर्या

प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः बिलक्रोडक्री
डज्जलडमरुटंकारसुभगस्तिरोधत्तांतापंत्रिदशतटिनीतांडवविधिः ३८

स्नानंतरंषट्घटिकात्मककाल
स्यांतर्मध्येनृत्यंकुर्वन् सचासौपुरमथनश्चशिवश्चतेनलीलयाउद्धृताः उत्ऊर्ध्वंधृताःइयंनृत्यचेष्टाएतादृश्यःयाः
जटाः संयताः केशाःजटास्यात्संयतालकाइतिकोशः तटेआभोगः पतनात्मकःसंयोगसंबंधः नृत्यत्पुरमथनली-
लोद्धृतजटानांतटाभोगःतेनप्रेंखंत्यःगच्छंत्यः चंचलावायालहर्यःवीच्यःताएवभुजाःसंतानंचविधुतिश्चसंतानवि

धुती संतानां दीर्घीकरणं विधुतिः कंपः भुजानां संतानविधुती यस्मिन् सप्रदोषांतः इदं समस्तं व्यस्तं वा उक्तप्रदोषलक्ष
णे प्रमाणं तु त्रिमुहूर्तं प्रदोषः स्यात् भानावस्तंगते सतीति हेमाद्र्याधृतवचनं बोध्यमिति दिक् संतानेत्यत्र संपूर्वक
धुञ् कंपने इत्यस्मात् स्त्रियां क्तिन् पुनः कथंभूतः त्रिदशतटिनी तांडवविधिः बिलक्रोडक्रीडज्जलडमरुटंकारस्फुभगः
बिलस्य विवरस्य क्रोडं अर्थात् मध्यः ननाक्रोडं भुजांतरमित्यमरः तत्र क्रीडत् विहरत् यज्जलं तदेव डमरुः वाद्यविशेषः
ढक्केत्यर्थः वाद्यभेदा डमरुमड्डुडिंडिमझर्झराइत्यमरः तस्य नेनवायः टंकारः शब्दविशेषः तेन स्फुभगः शोभनं

सदैव त्वय्येवार्पितकुशलचिंताभरमिमं यदि त्वं मामंब त्यजसि समयेऽस्मिन् स्फुविषमे ॥

स्फुत्वात्प्र
गंभीर्यस्य सः भगंश्रीकामसाहात्म्येत्यमरः स्फुं दर इत्यर्थः क्वचित्तटक्रोडेति पाठः ३८ इदानीं सर्वदा भवत्यां स्थापित
कुशलचिंताभरं मां त्वं विषमे अस्मिन् समये यदि त्यजसि तर्हि अतः परं भुवनत्रये तव विश्वासं कोपि न कुर्यात् तव करु
णात्व निराधारा स्यादिति गंगायाः भयप्रदर्शनेनाह सदैवेति भो अंब सदैव सर्वदैव त्वय्येव भवत्यामेव एवेत्यनेन तीर्था
नरं व्यावर्तयति अर्पितकुशलचिंताभरं कुशलस्य क्षेमस्य कुशलं क्षेममस्त्रियामित्यमरः तस्य चिंता कथं मम कुशलं



430

भविष्यतीत्याकारिकातस्याभरः आधिक्यंवद्धीचिंतेत्यर्थः भरः समूहोवा अर्पितः स्थापितः कुशलचिंताभरोयेन सः तंगंगेवममकुशलंकरिष्यतीतिमन्यमानंइत्यर्थः इमंत्वत्समीपेवर्तमानमेतादृशंमांस्फविषमेस्फतरामत्यंतंविष मोदुःसहःतस्मिन्अतिकठिनइत्यर्थः यद्वाविषंगरलंमयतेददातीतिविषमःतस्मिन्मेड्प्रणिदानेइत्यस्यआदेश उपदेशेशितीत्यात्वेआतोनुपसर्गेकइतिआतोलोपःइटिचेत्याकारलोपःएतादृशेस्मिन्समयेयादित्यजसितदात ह्रिअयंविश्वासःगंगाशरणागतकुशलकर्त्रीत्याकारोनिश्चयःत्रिभुवनतलात्त्रिभुवनस्यतलंतस्मात्अस्तंतिरोभा

तदाविश्वासोयंत्रिभुवनतलादस्तमयतेनिराधाराचेयंभवतिखलुनिर्व्याजकरुणा ३९ वंअयतेग

च्छतिगमिष्यतीतिवा वर्तमानसामीप्येतिभविष्यतिलट्चपुनः इयंनिर्व्याजकरुणा अकपटकरुणानिराधाराभ वति निर्गतः आधारोयस्याःसाएतादृशीभवति खलुनिश्चयेनसंदेहोनास्तीतिभावः विश्वासाभावेनकस्यापितव निकटेआगमनाभावात् करुणायास्तिरोधत्वात् लोकेपियस्यविश्वासोनास्तितस्यनिकटेकोपिनगच्छतीतिप्रसिद्ध मेव एवंचमाहात्म्यसंरक्षणायझटितिममोद्धारणंकुर्वितिगंगायाः प्रार्थनिमदर्शनमितिभावः क्वचित्तुसमयेइत्यस्य

स्थानेविषयेइतिपाठः तत्रविषयोद्धारणारूपेविषयेइत्यर्थः ३९ इदानींहरवामभागेकाद्दिली याकांतावर्ततेइति प्रेक्षितुंकपर्दादुल्लस्यसीमंतसरणौ आगताअतएवपार्वत्यासापत्न्यभावात् करेणाकर्षिताएताहृश्यस्त्वल्लहर्यो विजयंतामित्याह कपर्दादिति भोजननि तेत्वल्लहर्यः कपर्दात् शिवजटाजूटात् उल्लस्यप्रसृत्यप्रणयामिलद्दर्द्धांगयुवतेः प्रणयेनप्रीत्यामिलंतीसंयुज्यमाना अर्द्धांगेवामभागेयुवतिः पार्वतीयस्यसः तस्यपुरारेःशिव

कपर्दादुल्लस्यप्रणयामिलदर्द्धांगयुवतेःपुरारेःप्रेंखंत्योमृदुलतरसीमंतसरणौ भवान्या साप
त्न्यस्फुरितनयनंकोमलरुचाकरेणाक्षिप्तास्तेजननिविजयंतांलहर्यः ४०

स्यमृदुलतरसीमंतसरणौ अतिशयेनमृदुलः कोमलः मृदुलतरः तादृशोयःसीमंतः केशवेशः सीमंतः केशवेशेइतिशकंध्वादिगणसूत्रे यापररूपम् तस्यसरणिः तत्रप्रेंखंत्यः गच्छंत्यः उपरिष्टादधोभागेआगताइत्यर्थः पुनः कथंभूताः अतएवभवान्याः पार्वत्याकर्तृभूतया कोमलरुचा कोमलारुक्कांतिर्यस्यतेन एतेनपार्वतीसौंदर्यमुक्तम् अतएवशिवेनप्रीतिवशात् लहरीकर्षणेननिवारिताएताहृशेन करेण सापत्न्यस्फुरितनयनंयथास्यात्तथासमानः पतिर्यस्याः सास

पत्नी तस्याः भावः सापत्न्यं तेन स्फुरितेन कोपेन चंचलेन यनेयस्मिन्कर्मणि यथा भवति तथा आक्षिप्ताः
आकर्षिताः क्वचित्तु भवान्याइतिषष्ठ्यंतः पाठः तत्र भवान्याः करेण कर्तृभूतेनेत्यर्थः ४० इदानीं बहवो लोकाः त्वा
मायांति तत्र तेषामभीष्टं करोषीति कारणं वर्तते अहं तु स्वभावादेव त्वय्यनुरक्त इति तुभ्यं शपइत्याह प्रपद्यंतइति
भोमातः सुरधुनि कति लोकाः अत्र भवतीं पूज्यां भवतीं त्वां न प्रपद्यंते नायांति अपितु बहवः प्रपद्यंतइ त्यर्थः तत्रायमुपा

प्रपद्यंते लोकाः कृतिन भवतीमत्र भवतीमुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि
शपे तुभ्यं मातर्मम तु पुनरात्मा सुरधुनि स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ४१

धिः कारणं स्फुरति वर्तते किं तदित्याकांक्षायामाह यत् यस्मात् कारणात् अभीष्टं वांछितं वितरसि ददासि तेभ्य
इति शेषः मम तु पुनः जगन्नाथस्यात्मा स्वभावादेव निसर्गादेव त्वयि भवत्याम मितं अपरिमितं अनुरागं प्रीतिं विधृ
तवान् धारयामास इति तुभ्यं भवत्यै शपे शपथं करोमि श्लाघंन्हुङ्स्थाशपामिति संप्रदानत्वम् ४१ ६२

इदानींत्वदीया मृत्तिकामदीयंसमस्तंशोकंदूरीकरोत्विति प्रार्थयते ललाटइति पूर्वश्लोकात्संबोधनपदमावर्त्त-
नीयम् भोस्मरधुनि त्वदीयात्वत्संबंधिनीसामृत्स्ना प्रशस्तामृत् मृत्स्नासस्नौप्रशंसायामितिमृच्छब्दात्स्न
प्रत्ययः मृन्मृत्तिकाप्रशस्तातु मृत्सा मृत्स्नाच मृत्तिके त्यमरः ममजगन्नाथकवेः कृत्स्नामपिसंपूर्णामपिशु
चंशोकंहरतु ननुमृत्तिकायाः शोकहरणेकथंसामर्थ्यमित्याकांक्षायामाह साका यामृत्स्ना इहलोके ललाटेभाल
देशेसलिलंयथास्यात्तथातिलकितासती पुंड्रीकृतासतीतमोहंतुं तरुणतरमार्तंडतुलनाम् तरुणतरः मध्या

ललाटे यालोकेरिहखलु सलीलंतिलकितातमोहंतुं धत्तेतरुणतरमार्तंडतुलनाम् ॥

न्हिकोयोमार्तंडः सूर्यः तस्यतुलनांसाम्यंधत्ते बिभर्त्ति अत्रप्रमाणंतु गंगातीरसमुद्भूतांमृदंमूर्ध्ना बिभर्तियः
बिभर्तिरूपंसोर्कस्यतमोनाशाय केवलमिति ब्रह्मांड पुराणवचनं बोध्यम् तिलककरणप्रकारोप्युक्तस्तत्रैवयामहु-
स्तेजलंकृत्वा सावित्र्याचाभिमंत्रितम् तोह्यष्णोरितिमंत्रेणामर्दयेन्मृत्तिकांततः अतोदेवातिसूक्तेनतिलकंकारयेत्सदे
ति इदंतिलककरणंप्रातःस्नानोत्तरंबोध्यं पुनःसाकायाविधिलिखितदुर्वर्णसरणिम् विधिनाब्रह्मणालिखिताःते

चेतेदुर्वर्णाः दुष्टाक्षराणि अयं दरिद्रो भविता मृतभार्यश्चेत्यादयः तेषां सरणिः तां सद्यः पालनाद्यवहितोक्तिकाले एव - विलुंपंतीति विशेषेण लुंपंती प्रोच्छंती एवं च विधिलिखितमपि अलीकं कुर्वंत्याः मम शोकहरणे सामर्थ्यमस्तीति - भावः ४२ इदानीं मूढान्नरानुपहसंतः स्ववासिभ्रमराणां मालिन्यदोषं दूरीकुर्वाणाश्च गंगातीरतरवः मम सखायः संत्वित्याह नरानिति त्रिदशतटिनीतीरतरवः त्रिदशतटिन्याः गंगायाः तीरं तत्र तस्य वा तरवः वृक्षाः नः अस्माकं

विलुंपंतीसद्यो विधिलिखितदुर्वर्णसरणिं त्वदीयास्सन्मूर्त्स्नास्स्म हरतु कृत्स्नामपि शुचं ४२
नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो हसंतः सोल्लासं विकचकुसुमव्रातमिषतः॥

भक्तजनानां सखायः मित्राणि संतु भवंतु अथ मित्रं सखा स्यात्सुहृदित्यमरः कथंभूताः त्रिदशतटिनीतीरतरवः मूढान् मूर्खान् अत एव तत्तज्जनपदसमासक्तमनसः तेच ते जनपदाश्च तत्तज्जनपदाः स्वस्वदेशा नीवृज्जनपदो देश इत्यमरः तेषु समासक्तं संबद्धं एतादृशं मनो येषां ते तान् एतादृशान् नरान् मनुष्यान् विकचकुसुमव्रातमिषतः विकचानि प्रफुल्लानि यानि कुसुमानि पुष्पाणि तेषां व्रातः समूहः तस्य तदेव वा मिषं छलं तस्मात् सोल्लासं सहर्षं यथा

स्यात्तथाहसंतः उपहासं कुर्वंतः एतेषां दुष्टस्वीयस्वीयदेशरचिताभक्त्यातन्नैवमरणेन दुर्गतिर्भविष्यतीति अस्माकं तु सदैव गंगातीरवासित्वात् उभयगतिर्भविष्यतीति तानुपहसंतीत्युत्प्रेक्षा पुनः कथंभूताः नित्यमलिनाः नित्यं मलिनाः मालिन्ययुक्ताः तान् जन्मतः श्यामानित्यर्थः एतादृशान् अलिनः भ्रमरान् सौरभ्यैः निजकुसुमसौगंध्यैः संततं निरंतरं यथा स्यात्तथा पुनानाः पवित्रीकुर्वाणाः एवं च तादृशान् ये पुनंति ते स्वसखं मामपि पवित्रं करिष्यंतीति भावः

पुनानाः सौरभ्यैः सततमलिनो नित्यमलिनान्सखायो नः संतु त्रिदशतटिनीतीरतरवः ४३ यजंत्येके देवान्कठिनतरसेवांस्तदपरे वितानव्यासक्तायमनियमरक्ताः कतिपये ॥ सौरभ्यैः नित्यमलिनान् पुनाना इति वा योजना मधुलिण्मधुपालिन इत्यमरः ४३ इदानीं केचन स्वेष्टफलावाप्तये यमनियमादियोगं कुर्वंति अहं तु त्वन्नामस्मरणेन प्राप्तकामः सन् जगज्जालं तृणतुल्यं मन्य इत्याह यजंतीति भो त्रिपथगे एके लोकाः कठिनतरसेवान् अतिशयेन कठिना कठिनतरा सेवा येषां ते तान् एतादृशान् देवान् विष्ण्वादीन् यजंति पूजयंति तदपरे तेभ्यः देवपूजकेभ्यः परे अन्ये पंचमीति योगविभागात्समासः यद्वा ते देवपूजकाः अपरे येभ्यः -

तेइतिपंचम्यर्थेबहुव्रीहिः देवपूजकेभ्यउर्वरितइत्यर्थः वितानव्यासक्ताः वितानेषुउल्लोचेषुयज्ञेषुवाव्यासक्ताः विशे
षेणआसक्ताः तत्पराइत्यर्थः संतीतिशेषः अस्त्री वितानउल्लोचेइत्यमरः लोकेचांदवाइतिप्रसिद्धिः क्रतुविस्तारयो
रस्त्रीवितानंत्रिषुतुच्छकइत्यमरः कतिपयेन्येलोकाः यमनियमरक्ताः यमनियमयोरक्ताः अनुरक्ताः संतीतिशेषः
तान्कुर्वंतीत्यर्थः तत्करणकाठिन्यात् कतिपयपदोपादानंयमनियमग्रहणम् अष्टानामप्युपलक्षणंतेचयमनिय
मासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्रअहिंसादिपरिग्रहोयमः शौचादिसंपादनंनियमः पद्मका-

अहंतुत्वन्नामस्मरणाभृतिकामस्त्रिपथगेजगज्जालंजानेजननितृणजालेनसदृशं ४५

द्यासनंरेचकादिप्राणायामः इंद्रियाणांस्वस्वविषयेभ्यः प्रत्याहरणंप्रत्याहारः तत्रैवविच्छिद्यअंतरींद्रियप्रवाहो
ध्यानंचित्तवृत्तिनिरोधः समाधिरितिदिक् भोत्रिपथगेजननित्रीन्पथोगच्छतीतित्रिपथगा यद्वात्रयाणांपथांस-
माहारस्त्रिपथंपथः संख्याव्ययादेरितिनपुंसकत्वंतेनगच्छतीतित्रिपथगागमेडः तत्संबोधनंअहंतुजगन्नाथ-
स्तुत्वन्नामस्मरणकृतकामः सन् तवनामत्वनाम प्रत्ययोत्तरपदयोश्चेतित्वादेशः त्वन्नामस्मरणचिंतनंतेनकृताः

संपादिताः तादृशाः कामाः मनोरथाः येनसः एतादृशः सन् जगज्जालंजगतः जालंसमूहः जगज्जालंजालं
सूमूहः आनायइत्यमरः तृणज लेनकादिसंघेनसदृशंतुल्यंजानेवेद्मि तृणजालेनेति तुल्यार्थैरित्यादिनातृतीयाक
लौनामोच्चारणस्यैवसारत्वात्तदेवकरोमीतिभावः तदुक्तं हरेर्नामैवनामैवनामैव ममजीवनं कलौनास्त्येवनास्त्येव
नास्त्येवगतिरन्यथेतिदिक् अत्रनामशब्दोनामोच्चारणपरोबोद्धव्यः ४४ इदानींजन्मावधिनिरंतरंपुण्यवतांसा
धूनांश्रेयः कर्तुंबहवोदेवाः कुशलाः संति निराश्रयाणां पापिनांतु त्वांविना अन्यंहितकरंजगतिनपश्यामीत्याहअ

अविश्रांतंजन्मावधिस्कृतजन्मार्जनकृतांसतांश्रेयः कर्तुं कतिनकृतिनः संतिविबुधाः
निरस्तालंबानामकृतस्कृतानांतु भवतीं विनामुष्मिँल्लोके नपरमवलोकेहितकरम् ४५

विश्रांतमिति भोत्रिपथगेजननिअविश्रांतंनिरंतरंजन्मावधिजन्मप्रभृतिजन्मपर्यंतंवास्कृतजन्मार्जनकृतांस्क
कृतेनपुण्येनजन्मार्जनं जन्मसंग्रहस्तंकुर्वंतितेषांतादृशानांसतांसाधूनांश्रेयः कर्तुंकल्याणंसंपादयितुंकतिविबुधाः
कतिसंख्याकादेवाः कृतिनः कुशलाः नसंति अपितुबहवः संतीत्यर्थः निरस्तालंबानांनिरस्तः गतः आलंबः आश्र-
योयेषांतेषांअकृतसुकृतानांतुनकृतंस्कृतंपुण्यंयैस्तेषांपापिनामित्यर्थः तेषांतु अमुष्मिन्लोकेभवतींविनालामृते प

रं द्वितीयं हितकरं अभिमत संपादकं नावलोकेनपश्यामिएतत्सर्वं चित्ते निधायत्वामहं शरणंगत इतिभावः ४५ इ-
दानींतवजलंपीत्वामूढ मित्रैः सहविहर्तुं गतोहंक्वचिदपिसुखंनलब्धवान् इदानींमृदुपवनसंबंधशीतलस्त्वंकेचिर
कालमनिद्रंमांत्वंस्वापयेतिप्रार्थयते पयइति भोमातः तवपयःपीत्वाविमूढैः विशेषेणमूढाः मूर्खाः विमूढाः तैः विशेष
श्चईषदपिहिताहितज्ञानशून्यस्तंतादृशैः सहचरैः सहसाकंचरंतिभक्षंतिगच्छंतिवातेसहचराः मित्राणितैः सहसपदि
शीघ्रंसंरंतुंविहर्तुं यातःगतः गत्यर्थाकर्मकेत्यादिनायाधातोः कर्त्तरिक्तः एतादृशः अहंक्वचिदपिकास्मिंश्चित्स्थलेपिक-

पयःपीत्वा मातस्तवसपदि यातः सहचरैर्विमूढैः संरंतुं क्वचिदपिनविश्रांतिमगमम् ॥ स्मिं-

श्चिद्विवाहारेपिवाविश्रांतिं विश्रामं न अगमं सपदियात इतिवायोजना यद्वातवपयः सपदिपीत्वेतिसंबंधः एते नतृ
ष्णा वशात् शीघ्रंतवजलपानमात्रंकृतंनस्नानादिकम् तेनस्वस्मिन्नपराधबाहुल्यमस्तीतिसूचितम् भोसद
यत्हृदयेदयया सहितंसदयंतादृशंहृदयं यस्याः सातत्संबोधनम् एतादृशिभोमातः इदानींसंप्रतिएतर्हिसंप्र
तीदानीमधुनासांप्रतंतथेत्यमरः मृदुपवनसंचार शिशिरमृदुः कोमलः अल्पइत्यर्थः एतेनवात्यायाः दुःखप्र-

438

दत्वान्निरासः सूचितः मृदुश्चासौ पवनश्चतस्य संचारः गमनं संबंधी वातेन शिशिरः शीतलः एतेन श्रमसंत्रस्तस्य निद्रास्था
नयोग्यत्व मावेदितं एतादृशेउत्संगे अंके चिरात् बहुकालं उन्निद्रं उद्गता निद्रा यस्य सः एतादृशं मां शायय स्वा
पय निद्रां कारयेत्यर्थः शीङ् स्वप्ने इतिधातोर्णिजंताल्लोण्मध्यमपुरुषैकवचनं सिप् अतोहेः इतिहेर्लुक् नि-
द्रायाः सुखविशेषरूपफलस्य प्रयोज्यगामित्वात् प्रयोजकरूपकर्तृगामित्वाभावेन णिचश्चेति आत्मनेपदम्

इदानीमुत्संगे मृदुपवनसंचारशिशिरे चिरादुन्निद्रं मां सदयहृदये शायय चिरम् ४६ बधा
नद्रागेव द्राढिमरमणीयं परिकरं किरीटे बालेंदुं नियमय पुनः पन्नगगणैः॥ नचिराच्छायय इतिवायोजना

लोकेपि माता पुत्रं अंके स्वापयति इति प्रसिद्धमेव एतदर्थमेव मातरीति संबोधनं ४६ इदानीं मम उद्धारायकटिबंधादिकं कुर्वि
त्याह बधानेति भोस्सुरधुनि जगन्नाथस्य तन्नाम्नः अयं समुद्धारसमयः सम्यगुद्धरणं समुद्धारः तस्य समयः कालः अस्तीति
शेषः यद्यपि आत्मनाम गुरोर्नाम नामातिकृपणस्य च श्रेयस्कामो नगृण्हीयाज्ज्येष्ठापत्यकलत्रयोरिति निषेधात् स्व
नाम ग्रहणम श्रेयस्करं भवति तथापि अत्यंतातुरतया निषेधोल्लंघनम् अत एव हापितः कासि हे सुभ्रु बद्धैवविलंबा

पसइतिभट्टिप्रयोगः संगच्छकइतिदिक् ननुअस्तुतवोद्धारसमयः मयाकिंकर्तव्यमित्याकांक्षायामाह बधानेति त्वं-
द्रढिमरमणीयंअतिशयेनदृढः इतिद्रढिमावर्णदृढादिभ्यः ष्यञ्चेति चादिमनिचरन्कृतौहलादेर्लघोरिति ऋकारस्य
रकारः द्रढिमाचासौरमणीयश्चतम् अतिशयेनसुंदरंचेत्यर्थः एतादृशं परिकरं कटिंद्वाक् शीघ्रंबधानबध
बंधने भवेसरिकरोव्रातेपर्यंकपरिवारयोः प्रगाढगात्रिकबधेविवेकारंभयोरपीतिविश्वः ममोद्धाराय शीघ्रंका-
टिबंधंकुर्विति भावः पुनस्त्वंकिरीटे मुकुटे अथमुकुटं किरीटं पुंन्नपुंसकमित्यमरः बालेंदुंबालश्चासाविंदुश्चतम्

नकुर्यास्त्वंहेलामितरजनसाधारणतयाजगन्नाथस्यायंसुरधुनिसमुद्धारसमयः ४७

कलात्मकंचंद्रम् पन्नगगणैः पन्नंपतितंगच्छंतितेपन्नगाः सर्पाः तेषांगणाः समूहाःतैः नियमयनियमनंकुरु
तैर्नवस्थापयेत्यर्थः अन्यथाममागमनसमयेपतिष्यंतीति भावः लोकेपिकश्चनमनुष्यः कश्चिद्वाधादिर्पीडितस्य
यदामोचनंकरोतितदाकटिबंधशिरोभूषणादिकंदृढंकरोतीतिप्रसिद्धम् यद्वा किरीटे पन्नगगणैः बालेंदुं नियमयेति
योजना पुनस्त्वमितरजनसाधारणतयाइतरः अन्यः नीचोवा इतरस्त्वन्यनीचयोरित्यमरः सचासौलोकश्चज

नश्चतेनसाधारणः तुल्यः तस्यभावः साधारणतातयाहेलांअर्थात्ममअनादरंनकुर्याः माकुर्वित्यर्थः परमलब्धके
मयिअन्यजनतुल्योयमितिबुद्धिंमाकुर्वितिभावः अत्रलोकोक्त्यलंकारः तदुक्तंकुवलयानंदे लोकप्रवादानुकृतिर्लो
कोक्तिरितिभण्यतेइति ४७ इदानींगंगारूपंस्तौति शरदिति भासुरधुनियेजनाः त्वांध्यायंतिचिंतयंतितेषांजनानां
परिभवः अनादरः अनादरः परिभवः परिभावस्तिरस्क्रियेत्यमरः नउदयतिउत्पन्नोनभवतीत्यर्थः यद्यपिअयगता
विति धातुरात्मनेपदम् तथापिइटकिटकटीत्यत्रप्रश्लिष्टस्यईधातोरुत्सूर्वस्येदंरूपंबोध्यंअतएवउदयतिवित

शरच्चंद्रश्वेतांशशिशकलश्वेतालमुकुटां करैःकुंभांभोजेवरभयनिरासौचदधतीम्

तोर्ध्वरश्मिरज्जाविति माघप्रयोगः संगच्छतइति दिक्कथंभूतांत्वाम् शरच्चंद्रश्वेताम् शरदिशरत्काले अथशरत्स्त्रि
यामित्यमरः तत्रयश्चंद्रः तद्वत् श्वेतां शुभ्राम् परमगौरामित्यर्थः शरदित्यनेन परमनैर्मल्यसूचितम् पुनः कथं
भूताम् शशिशकलश्वेतालमुकुटाम् अलतिदंशंकुर्वन्गच्छतित्यलः सर्पः श्वेतश्चासौअलश्चश्वेतालः शुभ्र
सर्पः शशिनश्चंद्रस्यशकलः खंडः शशिशकलः शशिशकलश्चश्वेतालश्चशशिशकलश्वेतालौतौमुकुटेयस्याः सा



टीका
५५१

ताम् यद्वा श्वेताश्चते अलाश्च भूषणानि च श्वेतालाः यद्वा श्वेतस्य रजतस्य अलाः भूषणानि दुर्वर्णं रजतं रूप्यं-
खर्जूरं श्वेतमित्यपीत्यमरः गमन भूषणार्थकादल धातोः पचाद्यच् शेषसमासाः पूर्ववत् यद्वा शशिशकल श्वेतालः
तादृशो मुकुटो यस्याः सा ताम् यद्वा शशिशकल श्वेताल इव शुभ्र भूषणामिवेति व्याघ्रादित्वादुपमितस
मासः शशिशकल श्वेतालः तादृशो मुकुटो यस्याः सा ताम् यद्वा शशिशकल श्वेतः श्वेतगुणः तं आसमंतात्

सुधाधाराकाराभरणवसनां शुभ्रमकरस्थितां त्वां ये ध्यायंत्युदयति न तेषां परिभवः

४८

लातीति शशिशकल श्वेतालः तादृशो मुकुटो यस्याः सा ताम् यन्मुकुटे चंद्रस्य प्रभा प्रसृता भवतीति
भावः ला दाने इति धातोरातश्चोपसर्गे इति कः गुणे शुक्लादयः पुंसीत्यमरः यद्वा शशिशकलं च श्वेत श्च शशि-
शकलश्वेतौ श्वेतौ रजतं तौ आसमंताल्लातीति शशिशकल श्वेतालः तादृशो मुकुटो यस्याः सा तां यस्याः-
रौप्यमुकुटे शशिशकलं वर्तत इत्यर्थः अन्यत् विस्तर भयान्न लिख्यते पुनः कथंभूतां करैः चतुर्भिर्हस्तैः कुंभा

५९२

भोजे कुंभश्च अंभोजं च कुंभं भोजे कुंभो घटः अंभोजं कमलं ते वरभयनिरासौ च भयस्य निरासः नाशः अभयं इत्यर्थः वरश्च भयनिरासश्च वराभयनिरासौ तौ च दधती बिभ्रती चतुर्भिर्हस्तैरिमानि चत्वारि दधतीति भावः पुनः कथंभूतां त्वां सुधाधाराकाराभरणवसनां सुधायाः अमृतस्य धारा आभरणानि च वसनं च आभरणानि भूषणानि वसनं वस्त्रम् अलंकारस्त्वाभरणं परिष्कारो विभूषणं वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमित्यमरः सुधाधारावत् आकारः रूपं येषां तानि सुधाधाराकाराणि तादृशानि आभरणवसनानि यस्याः सा ताम् अतिशुभ्रा

दरस्मितसमुल्लसद्वदनकांतिपूरामृतैर्भवज्वलनभर्जितानिशमूर्जयंती नरान्

भरणवसनामित्यर्थः पुनः कथंभूतां त्वां शफरमकरस्थितां शफरश्चासौ मकरश्च शफरमकरः मकरो मत्स्यः तत्र स्थितां ताम् शफरमत्स्यवाहिनीमित्यर्थः ४८ इदानीं गंगा मम शरीरस्य रक्षणं करोत्वित्याह दरस्मितेति शंतनोः भीष्मपितुः अंगना कल्याणानि अंगनानि यस्याः सा अंगना अंगात्कल्याणे इति पामादिं तर्गणसूत्रेण अंगशब्दान्नप्रत्ययः श्रीगंगा मम जगन्नाथपंडितस्य तनोः शरीरस्य डिंतिह्रस्वश्चेति वैकल्पिकत्वात् घिसंज्ञायां गुणः शं सुखं सप

दिशीघं तनोतु विस्तारयतु प्रार्थनायांलोट् कथंभूता अंगना दरस्मितसमुल्लसद्वदनकांतिपूरामृतैः दरंईषत् तच्चतत् स्मितंचदरस्मितंतेनसमुल्लसद्विकासमानं तच्चतद्वदनंचतस्यकांतिः छविः तस्याः पूराः आधिक्यानि तएवामृतानितैः भवज्वलनभर्जितान् भवएवसंसारएवज्वलनः अग्निः तेन तत्रवाभर्जितादग्धास्तान् ए

चिदेकमयचंद्रिकाचयचमत्कृतिंतन्वतीतनोतुममशंतनोःसपदिशंतनोरंगना४९

तादृशान्नरान् मनुष्यान्अनिशंसेवदाऊर्जयंतीजीवयंती यद्वाभवस्यमहादेवस्यज्वलनः तृतीयनेत्राग्निः तेनत त्रवाभर्जितान् एवंचतादृशंकृत्यंकुर्वंत्याममवपुः स्फुरवकरणेनकोप्यायासइतिभावः पुनःकथंभूता अंगनाचिदेकमयचंद्रिकाचयचमत्कृतिंचिदेकमयींचित्स्वरूपासाचासौचंद्रिकाकौमुदीच चंद्रिकाकौ

५५५

सुधीज्योत्स्नाइत्यमरः तस्याः चयः समूहः तस्यचमत्कृतिः चमत्कारः तांतन्वती तनोतीतितन्वती विस्ता रयंती तनोतेः शताअनेकचंद्रप्रकाशांस्वयमेवकरोतीतिभावः अस्मिन् श्लोकेपृथ्वीछंदः जसौजसयला वसूग्रहयतिश्चपृथ्वीगुरुरीरितिलक्षणात् ४९ इदानींसंसारज्वालानिर्दग्धवपुषोममतापंशमयेत्याह

मंत्रैर्मीलितमौषधैर्मुकुलितंत्रस्तंसुराणांगणैःस्रस्तांसांद्रसुधारसैर्विदलितंगारुत्मतैः ग्रावभिः॥

मंत्रैरिति वीचीक्षालितकालियाहितपदे कालियस्याहितः शत्रुः कालियाहितःविष्णुः तस्यपदंचरणः वीच्याक्षालितंप्रक्षालितंवीचीक्षालितं कालियाहितपदंययासा तत्संबोधनम् यद्वाकालियाअहितः शत्रुर्यस्यसकालियाहितोविष्णुः शेषंपूर्ववत् यद्वाकालियेआहितं अर्थात् विष्णुनास्थापितंतच्चतत्पदंच

शेषंप्राग्वत् हे स्वर्लोक कल्लोलिनि स्वर्लोकस्य सुरलोकस्य कल्लोलिनी नदी तत्संबोधनं त्वंअधुनाभवज्वा
लावलीढात्मनः भवस्य ज्वालाः ताभिः अवलीढः कवलितः व्याप्तइत्यर्थः तादृशः आत्मायस्य तस्यम
मतापंतिरयनिवारयतिरयेतिपाठः तत्रतिरः कुरुतिरः शब्दाण्णिजंतात्लोट् अव्ययानांभमात्रेटिलोपः

वीचीक्षालितकालियाहितपदे स्वर्लोककल्लोलिनित्वंतापंतिरयाधुनाममभवज्वालावलीढा
त्मनः ५०

इतितिरसष्टेर्लोपः कचित्तुभवव्यालावलीढात्मनइतिपाठः तत्रभवएवव्यालः सर्पः तेनावलीढः ता
दृशआत्मायस्यस तस्येतिव्याख्येयम् ननुतादृशतापनिवारणेमंत्रादयोबहवः संतीतिचेत्तेपिनश
क्ताइत्याह मंत्रैरित्यादिमंत्रैर्मीलितंसाहसेनतापनिवारणाभावात् संकुचितमित्यर्थः अयंहेतुः सर्व

त्यपूर्वार्द्धे योज्यः बहुवचनं तु एकोपि न समर्थ इति बोधनाय एवमग्रेपि बोध्यं यद्वा यत्र बहुभिः संकुचितं तत्र एकस्य का वार्तेत्यर्थबोधनाय औषधैस्तापनिवारणाय योग्यैर्वैद्यशास्त्रप्रसिद्धैः मुकुलितमुकुलीभावमापन्नं स्फराणां देवानां गणैः संघैः त्रस्तं त्रासंगतं सांद्रस्फधारसैः सांद्राः निबिडाः ते च ते स्फधारसाश्चतैः

धूतेनागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदुमुख्यंसर्व स्वंहारयित्वास्वमथपुरभिदिद्राक्पणीकर्तुकामे॥

अमृतजलैः रसो जलेरसो हर्ष इत्यनेकार्थकोशः स्रस्तं अधः पतितम् स्रंसु अधः पतने पदत्वाभावात् वस्य स्वं स्विति दत्वं न गारुत्मतैः गरुत्मान् गरुडः गरुत्मान् गरुडस्तार्क्ष्य इत्यमरः देवता येषां ते गारुत्मताः तैः सास्य देवतेत्यण् यद्वा गरुत्मतः इमे गारुत्मताः तैः तस्येदमित्यण् एतादृशैः ग्रावभिः पाषाणैः पाषाणप्र

स्तरग्रावोपलाश्मानः शिलादृषदित्यमरः विदलितं विशेषेण दलितं स्फुरितम् विशेषश्चरखंडखंडभवनम्
अत्र सर्वत्र पूर्वार्द्धे नपुंसके भावे क्तः अत एव कर्तुरनभिहितत्वात् मंत्रैरित्यादिषु कर्तरि तृतीया अत्र श्लोके
शार्दूलविक्रीडितम् म्सौज्सौतौगादित्यऋषयः इति लक्षणात् ५० इदानीं गंगालहरीनटघटीतांडवं

साकूतं हैमवत्या मृदुलहसितया वीक्षितायास्तवांब
व्यालोलोल्लासिवल्गल्लहरिनटघटीतांडवं नः पुनातु॥ ५१॥

अस्मान्पुनात्विति प्रार्थयते धूत इति भोः स्वर्लोककल्लोलिनि तव भवत्याः व्यालोलोल्लासिवल्गल्लहरिनटघ
टीतांडवम् व्यालोलाश्चंचलाः उल्लासिन्यः ऊर्ध्वं उच्छलंत्यः वल्गंत्यः गच्छंत्यः एतादृश्यो याः लहर्यः ता एव न
टस्तस्य घटीतांडवं शिरसि घटीं धृत्वा नर्तनम् यद्वा नटस्य घटीतांडवं नटघटीतांडवम् व्यालोलोल्लासिवल्गा

हरीणांनटघटीतांडवम् ततन: अस्मान् भक्तजनान् पुनातु पवित्रीकरोतु व्यालोलद्यादिविशेषणविशिष्टत्व
हरीभवनेमूलमाह कथंभूतायास्तव द्यूतेदुरोदरे परस्याजिगीषयाअक्षै: क्रीडनंद्यूतंतत्रअत्रविजिगी
षाया: सत्वात् दिवोविजिगीषायामित्यनेननिष्ठातस्यणत्वंन नागेंद्र कृत्तिप्रमथ गणफणिश्रेणिनंदींदुमु
रव्यम् नागेंद्रोवासुकि: कृत्तिर्गजादिचर्मप्रमथगणा: तन्नामक: पारिषद: फणिश्रेणि: मणीनांरुद्राक्षा
दिमणीनांश्रेणि: पंक्ति: नंदीस्ववाहनभूतोवृषभ: इंदु: स्वशिरोभूषणभूत: चंद्र: एतेषांइतरेतरयो

धिभूषितानंगारिभूतभागासद्य: कृतानेकजनार्तिभंगा ॥

गद्वंद्व: नागेंद्रकृत्तिप्रमथ गणमणिश्रेणिनंदींदव: मुख्या: श्रेष्ठा: यस्मिन्तत् एताद्दशंसर्वस्वंसर्वंचतत्
— स्वंचसर्वस्वंधनंहारयित्वाशिवात्सकाशात् पार्वतीगृहीत्वाहारयितेत्यत्रणिजंतात्क्त्वा अत्रप्रयोज
ककर्तृत्वंपार्वत्या: प्रयोज्यकर्तृत्वंशिवस्य अतएवसमानकर्तृकयो: पूर्वकालेइत्यनेनक्त्वासुलभ: वीक्ष
णकर्तृकर्तृत्वाहरणामितिबोध: प्रकृतमनुसराम: अथसर्वस्वहरणानंतरंपुराभित्पुरनामानंदैत्यंभिन

त्तिविदारयतीतित्रिपुरभित् तस्मिन्शिवे स्वमात्मानंपणीकर्तुकामेसति पणनंव्यवहरणंपणः घञर्थेकविधा नमितिकः आपणःपणःयथासंपद्यतेतथाकर्तुमितिपणीकर्तुंकामः इच्छायस्यसः तस्मिन् लुंपेदवश्य मः कृत्येतुंकाममनसोरपिसमोवाहिततयोर्मांसस्यपचियुट् घञोरितिवृषोदरादिगणपठितवचनेनक र्तुमितिमकारस्लोपः तादृशेसतिमृदुलंहसितंहास्यंयस्याः सातथा इदानींसपत्नीभूतगंगायाचनेनक्लेष्टसि

मनोहरोत्तुंगचलत्तरंगागंगाममांगान्यमलीकरोतु ५२

द्धिर्भवीष्यतीत्याशयेनहसिता एतादृश्याहैमवत्या हिमवतोहिमाचलस्यापत्यंस्त्रीहैमवती तस्यापत्यमि त्यण् टिड्ढाणेतिङीप् तयापार्वत्यासाकूतं आकूतेनअभिप्रायेणसहितंसाकूतं तद्यथास्या तथावीक्षितायाः विशेषेणोक्षिताविक्षितातस्याः विशेषश्चजटाजूटस्थित्याद्रष्टुमशक्यायाअपियत्नतोदर्शनंव्यापारवत्त्वंय द्यपिशिवस्यपूर्वोक्तंसर्वस्वंमयादत्तं अतएवशिवः आत्मानंपणीकरोति तथापिगंगाउर्वरितावर्ततेसाचसा

पत्नीभूतत्वात्स्वामवमत्यएतावत्कालपर्यंतंशिवशिरसिस्थितावर्तते इदानींयाचयित्वादासीसंपादनीयेति साकूतमित्यस्यार्थइतिदिक् नर्तनप्रियस्यशिवस्यघूतंविस्मारयितुंगंगयानृत्यमारब्धमितिदिक् हेभवती त्यनेनकठिनहृदयत्वात्तेनस्सर्वस्वहरणेयोग्यत्वम् अस्मिन्श्लोकेस्रग्धरावृत्तम् स्रग्धराम्नौयानांत्रयेणत्रिमुनियतियुता भिः सप्तकाइतिलक्षणात् २२ इदानींचरमश्लोकेनस्वांगान्यमलीकरणंप्रार्थयते विभूषितेति गंगाभा गीरथी गंगार्थशब्दस्तुस्मृतंसद्यइत्यष्टमश्लोकेउक्तः ममजगन्नाथस्यांगान्यमलीकरोत्वित्यर्थः कथंभूतागं

इमांपीयूषलहरींजगन्नाथेननिर्मिताम्

गा विभूषितानंगरिपूत्तमांगा अनंगस्यकामस्यरिपुर्वैरीशिवः तस्योत्तमांगंमस्तकं विभूषितंस्वस्थित्या शोभायुक्तं कृतंअनंगरिपूत्तमांगंययासा पुनः कथंभूता सद्यःतत्कालमेवकृतानेकजनार्तिभंगा अनेकेच तेजनाश्चतेषामार्तिःपीडातस्याभंगः नाशः कृतःसंपादितःअनेकजनार्तिभंगोययासा यद्वा जनानांआर्त यःपीडाः अनेकाश्चताःजनार्तयश्चतासांभंगःअनेकजनार्तिभंगोययासासद्यः कृतानेकजनार्तिभंगे

त्येकं पदं वा पुनः कथंभूता मनोहरोत्तुंगचलत्तरंगा मनोहरा अतिरमणीयाः उत्तुंगाः उन्नताः चलंतः चंचलाः
तरंगाः यस्याः सा अस्मिन्पद्ये उपजाति नामकं वृत्तं इंद्रवज्रा तोज्जौगः अनंतरोदीरित लक्ष्मभाजौ पादौ य
दीयावुपजातयस्ता इति लक्षणात् ५२ स्वकाव्यपठनस्य फलमाह इमामिति पीयूषस्यामृतस्य लह
रीत्वं यथा पीतामृतलहर्या आनंदजनकत्वं तथा अस्या अपीति शेषः अन्यकृतिभ्रमवारणायाह जग

यः पठेत्तस्य सर्वत्र जायंते स्फरवसंपदः ५३

न्नाथेन निर्मितामिति निर्मितां कृतां शेषं स्फुगमं शिवम् ५३ यद्यप्यहं मंदमतिस्तथापि टीकासमाप्तिर्हि
बभूव शीघ्रम् नात्रापरं कारणमस्ति किंचित्कृष्ण भास्कर राज्ञा किल किंत्व मोघा १ नृपं द्विपं वा तुरगं मृगं वा शु
कं बकं वा महिषं वृषं वा हरी करोष्यंगनकं हि गंगे स्नातं भवत्यां सकृदीशसंगे २ नारायणो यस्य पितामह
हो ऽभून्मणीकभट्टश्च पिता तदीयः गोपी यदीया जननी स्फुशीला टीकाकृता तेन सदाशिवेन ३ भक्तोपो

इमहेतोः केदारत्वंस्थितोसिभूभृतिकिम् तत्राप्यागत्यत्वांस्वाशिवंयाचेहितत्सर्वम् ४ इतिसदाशिवकृताटीकासमाप्ता ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥

यहपुस्तक मुंबईमें "श्रीव्यंकटेश्वर" छापखानेमें श्रीकृष्णात्मज गंगाविष्णुबजाज इनोनें छपाया - मिति ज्येष्ठ कृष्ण ८ विक्रमसंवत् १९३८. ठिकाणा - मुंबादेवीबजार, मेरवानकी-चाली, नंबर ४४१, मुंबई.

453

इति गंगालहरी सटीका समाप्ता